

स्वपरबलमविचार्योद्यमशीलानां आपदुपासकत्वम्

[1]परेषामात्मनश्चैव योऽविचार्य बलाबलम् ।
[2]कार्यायोत्तिष्ठते मोहात् [3]आपदस्तमुपासते ॥

[4]स तु [5]चन्द्रः [6]चन्द्रसरोरक्षणे शशकान् प्रेषितवान् । [7]तत्र तेनैतदुक्तम्—[8]रक्षणीयाश्शशका [9]अस्मदीया [10]मच्छरीरप्रायाः, अस्माकं प्रेमभाजनम् । अत [11]एव मे शशाङ्क इति प्रसिद्धिः [illegible] ।

---

(1). (1): परेषामात्मनां चैव (क, ट). (2). कार्यमुत्तिष्ठते (अ). (3): आपदस्स समीहते (ध), व्यापदस्स समीहते (ट). (4). स तु चन्द्रसरोरक्षणे प्रेषितवान् (ध), स त्वं चन्द्रसरः (ट). (5). चन्द्रस्तव समक्षं प्रेषितवान् (च). (6). चन्द्रस्य सरो रक्षितुं मां प्रेषितवान् (ट), चन्द्रसरोरक्षणे प्रेषितवान् (ध). (7). तद्-नेनोक्तम्— (क, प), अनेनैतदुक्तम्- (च), तेनैतदुक्तम्- (ट), अनेनैवमुक्तम्- (त). (8). रक्षणीयाश्शशाः अस्म- (च, त, प), रक्षणीयाश्शशकास्ते अस्म- (ट). (9). अस्मच्छरीरात् [illegible] आविष्टाः अस्मा- (क). (10). मच्छरीरप्रियाः। ~~[illegible]~~ (ट), मच्छरीरप्रियाः। अत (त), मच्छरीरप्रियाः। अतो वयं शशका इति प्रसिद्धाः। एवं वदति (ध). (11). एव शशका इतः प्रस्थिताः। एवं वदति (अ), ~~अ~~ एव वयं शशका इति प्रसिद्धाः। एवं वदति (क, प), एवाहं शशाङ्क इति प्रसिद्धः। एवं वदति (च), एव वयं शशाङ्क इति प्रसिद्धाः। एवं वदति (त).

'परेषामात्मनश्चैव' इति पद्यभागानन्तरं 'शशाका अस्मदीया' इत्यारम्भपर्यन्तं 'अ' पुस्तके ग्रन्थपातः।

अथ च परेषां इत्येतत्पद्यमारभ्य 'रावं वदति' इति वाक्यारम्भपर्यन्तं 'व' पुस्तके नास्ति।

"स तु चन्द्रः" इति 'त' पुस्तके ग्रन्थपातः।

+ 'चन्द्रसर' इत्यनन्तरं 'ध्वनितवान्' इति वाक्यारम्भपर्यन्तं 'त' पुस्तके ग्रन्थपातः।

'चन्द्रसरः' इत्यारभ्य 'रावं वदति' इति वाक्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः।

'चन्द्रसरः' इत्यनन्तरं 'रावं वदति' इति वाक्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

'मंचकशरीरप्रायाः'- इत्यनन्तरं 'स द्विपन्द्रस्सभयमाह' इत्यारम्भपर्यन्तं 'ट' पुस्तकेऽन्या रीतिः।

'अस्माकं प्रेमभूमयः' इति 'क' पुस्तकमात्रपाठः।

+[1]एवं [2]वदति दूते [3]हस्तिराजः [4]सभय-माह— ⊕क्वासौ Fचन्द्रः ? दूतः— अस्मिन् एव सरसि क्रीडन् आस्ते । तत्र गत्वा स्वयमेव चन्द्रं राजानं विज्ञाप्य गम्यताम् ।→[5]स आह— एव-मस्तु [6]इति । [7]ततो गजः [8]सरसि [9]चन्द्रप्रतिबिम्बं [10]दृष्ट्वाब्रवीत्— देव ! अज्ञानात् ⊢मया कृतं [11]क्षम्यताम् ;

---

(1). एवमुक्तो- (ट), एवमुक्तवति दूते (ब). (2). वदति शशके स द्विपे-न्द्रस्सभय- (क). (3). यूथपतिस्सभय (ट), हस्तिराजस्सहर्षमाह- (प); गज आह- अथ क्व वर्तते भगवान् स्वामी चन्द्रः (स), यूथ-पतिर्भयादिदमाह- इदमज्ञानतः कृतम् (व). (4). सभयमाह—इद-मज्ञानात् (क). (5). दूत आह (त) (6) इति दूतेन तु निशि नीत्वा चन्द्र- (अ). (7). ततो दूतो रात्रौ गजः (त). (8). सरसि गत्वा चन्द्र- (त). (9). चन्द्रमसं सरसि दर्शयित्वा पादपातः कारितः । सोऽपि यूथपोऽब्रवीत् (अ). (10). दृष्ट्वा पादयोः पतितः अब्रवीत्—(त). (11). क्षम्यताम् इत्युक्त्वा पुनः- (अ, ट, त), क्षम्यताम्- इत्युक्त्वा गतः। अतोऽहं (ब).

+ 'एवं वदति' इत्यारभ्य 'हस्तिराजः' इत्यारम्भपर्यन्तं 'ट' पुस्तके नास्ति । अथ च— 'एवं वदति' इत्यारभ्य— 'पुनरत्र नागमिष्यामि' इत्यारम्भपर्यन्तं 'य' पुस्तके, 'अतोऽहं ब्रवीमि' इत्यारम्भपर्यन्तं 'र' पुस्तके, हस्तिराज इत्यारम्भपर्यन्तं 'ल' पुस्तके चान्या रीतिः।

⊕— 'क्वासौ' इत्यारभ्य 'स आह' इत्यारम्भपर्यन्तं 'अ' पुस्तकमात्रपाठः।

F 'चन्द्र' इत्यनन्तरं 'अतोऽहं ब्रवीमि' इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

→ 'स आह' इत्यारभ्य 'देव' इत्यन्तं 'अ', 'त' पुस्तकयोः पाठः।

⊢ 'मया' इति 'अ', 'क' पुस्तकयोः पाठः॥

[1]पुनरत्र ⊕[2]नागमिष्यामि +[3]इत्युक्त्वा चन्द्राय [4]प्रणम्य स्वयूथेन सह अन्यत्र पलायितः । अतोऽहं ब्रवीमि- [5]व्यपदेशेन इति । ⊢[6]अतोऽयं व्यपदेश्यः [7]क्षुद्रात्मा नालं प्रजाः [8]पालयितुम् । अपि च—

---

(1). पुनर्गच्छामीति प्रणम्य गतः । अतोऽहं (अ), पुनर्न गच्छामि; इतःपरं न गच्छामि- इत्युक्त्वा (त), पुनर्न गच्छामी-त्युक्त्वा (प), न चाहं पुनरिह आगमिष्यामि इति (ब), पुनर्न गमि-ष्यामि (व). (2). न गच्छामीत्युक्त्वा (क), नागच्छामि-चन्द्राय प्रणम्य (ट). (3). इत्युक्त्वा प्रणम्य (क, न, प). (4). प्रणम्य चन्द्राय सहसा स्व- (क), प्रणम्य सहसा स्व- (ट), प्रणम्य गतः । अतोऽहं (त, प). (5). व्यपदेशेन महतां इति (य, ल), व्यप-देशेन सिद्धिस्स्यादिति (ट), व्यपदेशेऽपि सिद्धिस्स्यादिति (ब). (6). अतोऽयमव्यपदेश्यः प्रजाः (अ), अतोऽयमव्यपदेशक्षुद्रात्मा न प्रजाः (क), अतोऽयमद्य अव्यपदेश्यः क्षुद्रमनाः अलं प्रजाः (च), अतोऽयमव्यपदेशः क्षुद्रात्मा न प्रजाः (ट), अतोऽयं व्यप-देश्यः क्षुद्रात्मा न प्रजाः (त), अतोऽयमपि अव्यपदेशः क्षुद्रात्मा प्रजाः (प). (7). क्षुद्रोऽयं दुरात्मा पापबुद्धिः अशक्तः इत्र प्रजाः (स), क्षुद्रोऽयं दुरात्मा न शक्तः प्रजाः (ब), (8). पालयितुम् । किं स-क्षुद्र- (अ), पालयितुम् । क्षुद्र- (क, ट, य), पालयितुम् । अपि च- (च, त, र), पालयितुमसमर्थः । क्षुद्र- (ल).

⊕ 'नागमिष्यामि' इत्यनन्तरं 'अतोऽहं' इत्यारम्भपर्यन्तं 'व' पुस्तकेऽन्या रीतिः ।

+ 'इत्युक्त्वा' इत्यत्र-'इति' इत्यनन्तरं-'अतोऽहं' इत्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः ।

⊢ अतोऽयं इत्यारभ्य 'क्षुद्रात्मा' इत्यन्तं 'य' 'र', पुस्तकयोः, 'क्षुद्रमर्थपति' इति यद्यारम्भपर्यन्तं 'ल' पुस्तके च अन्या रीतिः ।

क्षुद्राशय जन्यं-दुष्फलम्

*क्षुद्रमर्थपतिं [1]प्राप्य [2]कथं [3]विवदतोस्सुखम् ।
उभावपि [4]क्षयं [5]प्राप्तौ यथा शशकपिञ्जलौ ॥

[6]विहगा [7]ऊचुः । तात ! [8]कथमेतत् ?

वायस [9]आह –

---

(1). प्राप्य तन्मध्ये वदतः सुखम् (प), प्राप्य न्यायान्वेषण-तत्परौ । उभा- (ल). (2). कस्मात् विव- (अ, क, ट, त), कुतो विव- (ख), कदा विव- (ट). (3). विवदतः सुखम् । (क), विवदतां सुखम् । (ख). (4). क्षयं यातौ (क, ट, प, ख), क्षयं नीतौ (त). (5) प्राप्तौ मार्जारात् शशतित्तिरी ॥ पक्षिण ऊचुः – (ट). (6). विहङ्गमाः कथ- (क), ते आहुः – कथ-(ट), ते प्रोचुः – कथ- (ल). (7). ऊचतुः – कथ- (अ), ऊचुः – तात ! कथ- (ज), ऊचुः – कथ- (ट, त, प). (8). कथमेतत् ? स आह –(अ), कथमेतत् ? काक आह – (क), कथमेतत् ? वायसोऽब्रवीत् – अहं (ख), कथमेतत् ? काकः – पुरा (ट), कथमेतत् ? सोऽब्रवीत् – अहं (त, प), कथय; कथमेतत् ? वायस आह – अस्ति । कस्मि- (ख), कथमेतत् ? सोऽब्रवीत् । अस्ति । अहं (ट), कथमेतत् ? स आह – कस्मि- (ल). (9). आह – कस्मि- (ल).

---

*

क्षुद्रस्वामित्वे चटकशशककथा-५

[1]अहं [2]पुरा [3]कस्मिंश्चित् [4]वृक्षैक-देशे न्यवसम्। [5]तत्राधः + कोटरस्थेन ⊕-[6]कपिञ्जल-नाम्ना [7]विहगेन सह स्नेहेन [8]स्थितः। [9]अथ [10]कदाचित् ⊢[11]कपिञ्जलः [12]सायंसमये F नायातः।

---

(1). अहं कस्मिं- (र). (2). पुरा वृक्षै- (अ, च, त, प), पुरा वृक्षे कस्मिं- (क). (3). कस्मिंश्चित् न्यव- (क). (4). वृक्षे तदधः (ट), वृक्षे पुरा स्वयमहमवसम्। अथ तस्यैव वृक्षस्याधस्तात् (ल), वृक्षे प्रतिवसामि। तत्रैवाधस्तात् कपिञ्जलः (र), वृक्षे पुराहमवसम्। तत्राधस्तात्कोटरे कपिञ्जलः (ल). (5). तस्याधस्थ-कपिञ्जल- (अ), तत्र कोटरस्थेन (च), तदधः (ट), तत्र कोटर (प). (6). कपिञ्जलेनात्मविभेदेन सस्नेहेन (क), कपिञ्जलेन विहगेन (त), कपिञ्जलेनात्मविभेदेन सस्नेहेन (प). (7). विहङ्गेन सस्नेहेन (ट), विहगेन सस्नेहेन (त), ~~[illegible]~~ (8). स्थितोऽस्मि। अथ (क), स्थितः। स कदाचित् (च). (9). अथ जातु कपिञ्जलः (अ). (10). कदाचिदालापवेलायां कपिञ्जलः (र). (11). कपिञ्जलं सायं (त), कपिञ्जलः नायाति (र). (12). सायंसमये विपिनात् न समागतः (च), सायंसमये वनान्ते न्यवसत्समागतः (प).

+ 'तत्राधः कोटरस्थेन' इत्यनन्तरं- 'मूढ! उपस्थानो ~~पैशो~~ यासि' इत्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः।

⊕- 'कपिञ्जल नाम्ना' इत्यनन्तरं 'अथ कदाचित्'- ~~[illegible]~~ इत्यारम्भपर्यन्तं 'र, ल' पुस्तकयोरन्या रीतिः।

⊢ 'कपिञ्जलः' इत्यनन्तरं 'बहिर्निर्गत्यान्यत्रोपसर्पतु' इत्यत्र 'उपसर्पतु' इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

F 'नायातः' इत्यनन्तरं 'दीर्घकर्णो नाम शशक' इत्यारम्भ-पर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

[1]ततोऽहं ⊕[2]उद्विग्नमनाः [3]सर्वाः दिशः अपश्यम्। अनन्तरं [4]तस्यावासकोटरे दीर्घकर्णो नाम [5]शशकः मया [6]निषिद्ध्यमानोऽप्यागत्य [F7]प्रविष्टः। अथ [8]स तत्र कियन्तं [9]कालं [10]यावत् तिष्ठति [11]तावत् स [12]कपिञ्जलः [13]समायातः। [14]तेनोक्तम् – इदं मदीयं [15]स्थानम्। भवान् [16]बहिर्निर्गत्यान्यत्रोपसर्पतु – [17]इति। [18]दीर्घकर्ण आह – [E19]मूढ! [S-20]उपस्थानोपभोग्यानि योग्यानि [21]आवसथादीनि भवन्ति। तथा हि –

---

(1). ततोऽहं समुद्विग्नः सर्वदिशः (त). (2). उद्विग्नः सर्वदिशः पश्यन् तिष्ठामि – तस्य (अ), उद्विग्नमानसवान् दिशः (च), उद्विग्नः सर्वदिशः (ट). (3). सर्वदिशः (क), सर्वदिशः पश्यन् तिष्ठामि। अनन्तरं (त), सर्वा दिशः पश्यामि। अनन्तरं (प). (4). तस्यावसथकोटरे दीर्घ- (क, ट, प), तस्यावस्थानकोटरे दीर्घ- (च), तस्यावासकोटरे दीर्घ- (त). (5). शश आगतः (ट). (6). निषिध्यमानः प्रविष्टः। (अ, क, ट), निषिध्यमानोऽप्यागम्य प्रविष्टः (प). (7). प्रविष्टः। कियत्कालं यावत् (अ), प्रविष्टः। अथागत्य कपिञ्जलः (क). (8). स यावत् कियत्कालं तिष्ठति स कपिञ्जलः (ट). (9). कालं स्थितं यावत् (प). (10). यावत् न तिष्ठति (अ), यावत् न गच्छति तावत् (प). (11). तावत् कपिञ्जलः (अ, च, त, प). (12). कपिञ्जलः कोटरं प्रविशन् बहिः (क). (13). समायातः। शशः कपिञ्जलेनोक्तः – मदीयमिदं स्थानम् (च). (14). तेनोक्तम् – ममेदं स्थानम्। (अ), तेनोक्तम् – मदीयं स्थानं (त). (15). स्थानम्। तदुपसरतु। स आह – (अ), स्थानम् – अपसर्पताम्। मूढ! (च), स्थानं समर्प्यताम्। स आह – (त), स्थानं उपसर्प इति (प). (16). बहिर्निर्गच्छताम् – इति (क), अपगम्यतां मदीयनिकेतनात् इति (ट), तच्छीघ्रं निष्क्रम्यताम्। शशक आह – (ल). (17). इति शशकमाह (क),

स आह (व). (18). दीर्घकर्णः – मूढ! (ट). (19). मूढ सम्रुद्धयानि आवसथानि। वापी- (क), मूढ! त्वद्वस्थानयोग्यानि (ज), मूढ! उप- (ह), मूढ! मम उप- (त), मूढात्मन्! अस्मद्वस्थानोपभोग्यानि (ग), मूर्ख! (य). (20). उपस्थानयोग्यानि (अ, ट, न), उपस्थानमात्रभोग्य एव आवासः (व), उपस्थानयोग्य एव आवासः (र). (21). आवसथस्थानानि — वापी- (अ), आवासस्थानानि — वापी- (ज), आवसथानि — वापी- (ह), आवसथादिस्थानानि — वापी- (त), आवसथादीनि स्थानानि भवन्ति (प).

+ 'ततः' इति 'क, ट, व' पुस्तकमात्रपाठः।

⊕– 'उद्विग्नमनाः' इति त्रुटितताडे लुप्तः – पाठः – 'व' पुस्तके।

⊢ 'मया' इति 'अ, क, ट पुस्तकमात्रपाठः।

F 'प्रविष्टः' इत्यनन्तरं 'बहिर्निर्गत्य' इत्यारभ्यपर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

E 'मूढ' इत्यनन्तरं "उपस्थानोव"– इत्यस्मात् पूर्वं 'य, र' पुस्तकयोरन्या रीतिः।

'मूढ' इत्यारभ्य 'वापीकूप' इति पद्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

S– उपस्थानोपभोगयोग्यानि इत्यनन्तरं 'वापीकूप' इति पद्यारम्भपर्यन्तं 'य, र' पुस्तकयोरन्या रीतिः।

वाप्यादिस्थानस्वाम्यनियामिका नीतिः

[1]वापीकूपतटाकानां [2]गृहस्यावसथस्य च।
[3]उत्सर्गात्परतः स्वाम्यमपि कर्तुं न शक्यते॥

[4]तथाहि – [5]व्यावहारिकान् पृच्छावः – [6]इत्युक्ते [7]तथैव तौ चलितौ। [8]अहमपि [9]कुतूहलादेव तौ [10]अन्वगमम्। [11]ततो [12]नातिदूरं गते [13]कपिञ्जलेनोक्तम् – कः पुनः [14]आवयोः [5]न्यायदर्शी भविष्यति इति।

---

(1). वापीकूपतडागानां (ल). (2). गृहस्योपवनस्य (...) च (य), देवालयकुजन्मनाम्। उत्सर्गात्परतः (ल). (3). नामाद्यप्रत्ययासिद्धिरित्येवं मनुरब्रवीत् – तथैव व्याव (अ), सामीप्यात् न्यायशास्त्रसिद्धिरित्येवं मनुरब्रवीत् (क, च, ट, त), सामीप्यात् न्यायशास्त्रसिद्धिः इत्येव मनुरब्रवीत् (ग). साभन्तप्रत्ययासिद्धिरित्येवं मनुरब्रवीत् (व, र). (4). तथैव व्याव- (अ), आवां व्याव- (क), तथा च व्याव- (च, त, प, य, र). (5). व्यावहारिकाश्च पृच्छन्नामित्युक्ता तौ (अ), व्यावहारिकाः प्रष्टव्याः इत्युक्ते (ट), व्यावहारिकान् पृच्छ इत्युक्ते (प), स्मार्तान् पृच्छावः (य). (6). इत्युक्ते तौ (ट). (7). तथैव चलितयोः पश्चात् अहमपि (च), तथैव चलितौ (प). (8). अहं च पदवीं अकौतुकात् तावत् अनुगतः। ततो (अ), अहमपि कौतूहलादेव तयोरनुगतः। गच्छन्नेव कपिञ्ज- (त), अहमपि कौतुकात्तयोरेव पृष्ठतो लग्नः (य), ततः कौतुकादहमपि तावदनुप्रस्थितः (ल). (9). कुतूहलादेव तयोरनुगतः। गच्छन्नेव कपिञ्जलः शशकमाह – कः पुनः- (क), कुतूहलादेव चलितेऽनुगतः च नातिदूरं गत्वा कपिञ्जलेन (च), कुतूहलादेव तयोः अनुगतः। ततो (प). (10). अन्वगमं दूरं (ल). (11). अथ नातिदूरं गत्वा (य). (12). नातिदूरं

गत्वा कपिञ्जल- (अ, र). (13). कपिञ्जलेनोक्तम् - कोऽपि पुन रावयोः (थ), कपिञ्जलः शशमाह - क आवयोः (र). (14). आवयोर्व्यवहारदर्शी ? शशक आह - (अ), आवयोः न्यायं × × × × × इति (क), आवयोः व्यवहारं द्रक्ष्यति (थ, र).

+ 'तथाहि,' इत्यनन्तरं 'व्यावहारिकान्' इत्यस्मात्पूर्वं 'य' पुस्तकेऽन्या रीतिः।

अथ च - "तथाहि" इत्यनन्तरं - "ततो नातिदूरं" - इत्यारम्भपर्यन्तं 'र' पुस्तके, "अहमपि कुतूहलात्" इत्यारम्भपर्यन्तं 'ल' पुस्तके चान्या रीतिः।

⊕ 'प्रच्छावः' - इत्यनन्तरं "अहमपि कुतूहलात्" - इत्यारम्भपर्यन्तं 'थ' पुस्तकेऽन्या रीतिः।

⊢ 'अन्वगमम्' इत्यनन्तरं "ततः" इत्यस्मात् पूर्वं 'य' पुस्तकेऽन्या रीतिः।

F 'ततः' इत्यारभ्य 'न्यायदर्शी भविष्यति' इत्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

E 'गते' इत्यनन्तरं 'क पुनः' इत्यारम्भपर्यन्तं 'य' पुस्तके अन्या रीतिः।

S- 'न्यायदर्शी' इत्यत्र - 'न्याय' इत्यनन्तरं 'इति' इत्यारम्भपर्यन्तं 'क' पुस्तके नाऽस्य त्रुटितत्वात्पाठो लुप्तः।

Ð "भविष्यति इति" - इति 'प, य, र, ल' - पुस्तकेषु न दृश्यते॥

[1]शशक [+][2]आह— अस्ति [3]कश्चित् [⊕][4]यमुनातीरावसथे दधिकर्णो [⊢][5]नाम [F][6]वृद्धमार्जारः। स [7]चान्द्रायणादितपश्चरन् वसति। सोऽस्माकं [8]न्यायदर्शी भविष्यति— [E]इति। कपिञ्जलः— स कथमावयोः [9]विश्वसनीयः?। [10]क्षुद्रा हि [11]मार्जारजातिः?

---

(1). शशकः— यमुना- (क,त), शशः— यमुना- (ट), सोऽब्रवीत्— (ज), अथावब्रवीत् (र). (2). आह— यमुना- (अ,प). (3). कश्चित् तमालारण्ये यमुना (ज). (4). यमुनातीरस्थो दधि-(अ), यमुनातीरावसथे वृद्ध-(क). यमुनारण्यतीरे दधि- (च), यमुनातीरवासी दधि- (ट,त), यमुनातीरं आवसथः वृद्ध- (प), गङ्गायाः पुलिने (य), नदीपुलिनगतस्तपस्संश्रितः उदधिकर्णो (र). (5). नाम मार्जारः सः चान्द्रा- (त). (6). वृद्धमार्जारः सदा चान्द्रा- (अ), वृद्धमार्जारः। दधिकर्णो नाम सः चान्द्रा- (क), वृद्धवनमार्जारः अत्र वसतीति जगति ब्रुवन्ति। किं न श्रूयते सः चान्द्रा- (च), वृद्धमार्जारः चान्द्रा- (ट,प), मार्जारः (र). (7). चान्द्रायणादितपश्चरः वसति (अ), चान्द्रायणतपश्चरन् (प). (8). न्यायदर्शी कपिञ्जलः (अ), न्यायान् विधिष्यति। कपिञ्जलः (त). (9). विश्वास- (अ,च,ट,न,प). (10). क्षुद्रमार्जारः। दीर्घकर्ण आह (प). (11). मार्जाराः। शशकः— किं इह भ × × × ? सि कपि- (क), मार्जारजातिः। दीर्घकर्णः— किमवसन्नोऽपि कपि-(ट), मार्जारजातिः। दीर्घकर्ण आह— (त).

+ 'आह' इत्यनन्तरं 'यमुना' इत्यारभ्यपर्यन्तं 'य,र' पुस्तकयोः, 'वृद्धत्वात् कथमुदरपूर्तिः' इत्यारभ्यपर्यन्तं 'त' पुस्तके चान्या रीतिः।

⊕ यमुनातीरावसथे इत्यनन्तरं 'दधिकर्णो' इत्यस्मात् प्राक् 'य' पुस्तकेऽन्या रीतिः।

⊢ 'नाम' इत्यनन्तरं 'वृद्धमार्जारः' इत्यस्मात् प्राक् 'र' पुस्तकेऽन्या रीतिः।

F 'वृद्धमार्जारः' इत्यनन्तरं 'दूरात् न शृणोमि' इत्यारभ्यपर्यन्तं 'य' पुस्तके, 'बहिः किञ्चिन्निर्गत्याब्रवीत्' इत्यारभ्यपर्यन्तं 'र' पुस्तके चान्या रीतिः।

E 'इति' इति 'प' पुस्तकमात्रपाठः।

स [1]आह– [2]किमासन्नोऽसौ करिष्यति ? पुनश्च स मार्जार एवाति विश्वसनीयः। [3]कपिञ्जलः– [4]उभयोरपि समो [5]दोषः [6]नीतिमाने इति। अथ [7]चलितौ तौ च वृक्षकोटरं निकटीभूय– "उभावपि दधिकर्णं व्यवहारार्थं त्वत्समीपमुपागतौ" इति ऊचतुः। स [8]श्रुत्वा विधिनोपपादितमिति मत्वा बहिः किञ्चिन्निर्गत्याब्रवीत्– पुरा बाल्ये बहवो हिंसिताः। अतस्तपश्चरामि। वृद्धत्वात् कथमुदरपूर्तिरिति चेत्–

---

(1). आह– पुनश्च (स), आह– किमवसन्नो करिष्यति ? कपिञ्जलः– (त), आह– किमासन्नोऽसि ? उभयोरपि (प). (2). किमसौ करिष्यति कपिञ्जलः (अ). (3). कपिञ्जलः– आवयोर्वा समो (अ). (4). उभयोरपि दोषः (क, ट), उभयोरपि समदोषः इत्युक्त्वा गतौ वृक्षकोटरं (स), समदोषः इत्युक्त्वा तौ गत्वा च दधिकर्णेन कथितम्। वृद्धोऽस्मि क्षायिण्या दूरे न शृणोमि (त), उभयोरपि नीतिमाने (प). (5). दोष इत्युक्त्वा तौ चलितौ (अ), दोषः सम इत्युक्त्वा गत्वा च ताभ्यां दधिकर्णो कथितम्– विपदास्पदम्– वृद्धोऽस्मि– इन्द्रियवैकल्यात् (क), दोषः समः इत्युक्त्वा तौ गत्वा दधिकर्णनामानं प्रणम्य कथितम्– वृद्धोऽस्मि – इन्द्रियवैकल्यात् (ट). (6). नीतिमाने इत्युक्त्वा गतौ। दधिकर्णेन कथितम्– वृद्धोऽस्मि वैकल्यात् दूरे न शृणोमि (प). (7). चलितौ गत्वा च विदितसकलवेदपुराणतत्त्वार्थः दधिकर्णः आवयोस्संवादं श्रुत्वा (अ). (8). श्रुत्वा धर्मो नीयताम्। दधिकर्णेन कथितम्– अहं वृद्धोऽस्मि। इन्द्रियवैकल्यात् (अ).

+ "किमासन्नोसौ करिष्यति" इत्यत्र 'करिष्यति' इत्यस्मिन् स्थले 'क' पुस्तकेताळस्य त्रुटितत्वात् पाठलोपः।

→ "पुनश्च स मार्जार रावातिविश्वसनीयः" — इति 'च' पुस्तकमात्रपाठः।

→ 'वृक्षकोटरं' इत्यारभ्य 'किं नाम वनजातेन' इत्येतत् श्लोकानन्तरस्थ-'इति' इति शब्दान्तं 'च' पुस्तकपाठः।

⊢ अत्र च— वृद्धोऽस्मीति 'च' पुस्तकपाठस्य स्थाने 'वृद्धत्वात्' इति 'ख' पुस्तकपाठः आदृतः।

उदरभरणे लौल्यस्यायुक्तता

किं नाम वनजातेन शाकेनापि न पूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यादसमञ्जसम् ॥ [illegible]॥

वार्धक्येन [1]इन्द्रियवैकल्यात् [2]दूरात् न [3]शृणोमि +शब्दम् इति । ततस्तौ [8]स्तोकं [4]निकटीभूय [5]कथयतः । [6]अथ [7]पुनःपुनः [8]तयोस्सन्निधानार्थं [9]विश्वासमुपपादयन् दधिकर्णः [10]धर्मशास्त्रश्लोकान् [11]अवोचत्—

---

(१). इतेन्द्रियत्वाच्च नातिस्पष्टतरं शृणोऽस्म्यहम् (ट). (२). दूरे न (अ, क, च, ट, त, प), दूरात् श्रुवयोर्भावान्तरं न सम्यक् शृणोमि (थ), दूरात् श्रुवयोः भावान्तरं सम्यक् न शृणोमि (ल). (३). शृणोति न दृश्यते दृष्टिरपि गतिर्गलितश्च । ततो भवन्तौ निकटीभूय (ज). (४). निकटीभूय भूयोभूयः कथ- (ट), निकटे भूयः कथ- (प). (५). कथयतः पुनः- (अ), कथयेते । तथापि सन्निधा- (प). (६). अथ तयो- (क, ट), अथ तथापि तत्सन्निधानार्थं धर्मशास्त्र- (च), अथ शशकसन्नि[illegible] (त). (७). पुनःपुनः सन्नि- (अ). (८). तयोर्विश्वासार्थं धर्मशास्त्र- (क, ट). (९). विश्वासमुपनयन् (अ), विश्वासमुपपादयता धर्मशास्त्र- (त, प). (११). धर्मशास्त्रं पठति— धर्म राव (अ), धर्मशास्त्रं दधिकर्णेन पठितम्— धर्म राव (च), धर्मशास्त्रं पठितम्— धर्म राव (त), धर्मशास्त्रं दीर्घकर्णेन पठितम्— धर्म राव (प), धर्मशास्त्रसंबद्धं अवोचत्— (ट). (११). अपाठयत्— धर्म राव (क, ट).

+ 'शब्दं' इति 'क' पुस्तकमात्रपाठः । एवं शब्दं इत्यारभ्य [illegible] श्लोकार्धेन इति पद्यारम्भपर्यन्तं 'य' पुस्तके 'धर्मशास्त्रश्लोकान्' इत्यारभ्यपर्यन्तं 'ट' पुस्तके चान्या रीतिः

धर्मरक्षणस्य आवश्यकता

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद्धर्मो न [1] हन्तव्यः लोकद्वयहितैषिणा ॥

सुहृद्धर्मस्य नित्यता परमार्थता च

+एक [2] एव सुहृद्धर्मः निधनेऽप्यनुयाति [3] यः।
शरीरेण [4] समं नाशं [5] सर्वमन्यद्धि गच्छति ॥

अहिंसाधर्मस्य उत्कृष्टता

⊢अन्धे [6] तमसि [7] वर्तेयं यदि मिथ्या वदाम्यहम्।
[8] अहिंसायाः परो धर्मो न भूतो न भविष्यति ॥

परोपकारपीडनयोः फलम्

→श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
परोपकारः पुण्याय पापाय परपीडनम् ॥

---

(1). हन्तव्यः मा स्म धर्मो हतोऽवधीत्। एक एव (अ), हन्तव्यः मा सुखं मानमिच्छता ॥ एक एव (क), हन्तव्यः मा सुधर्मं विना विधिः ॥ एक एव (ट), मा स्म धर्मं विना विधिः ॥ एक एव (त), मा सुखं मानमिच्छता ॥ एक एव (प). (2). एव सतां धर्मः (प). (3). यः ॥ पुनश्शरीरेण (अ). (4). समं नूनमतैव गच्छति (अ). (5). सर्वमन्यत्न गच्छति (क, च, ट, प), सर्वमतैव (त). (6). तमसि दुष्पूरे यदि [illegible] (च), तमसि दुष्पारे यदि (त). (7). वर्तेयं न करे नित्यं यदि यदि मिथ्या (ब). (8). अहिंसा परमो (क, च).

+ इदं च – 'एक एव' इति पद्यं 'ब' पुस्तके ४१ (मार्जारगृध्रकथायां) नं पद्यमस्ति।
⊢ 'अन्धे तमसि' इति 'प' पुस्तके न दृश्यते
→ अस्य – 'श्लोकार्धेन' इति पद्यस्य पूर्वार्धपाठान्तरं यथा 'य' पुस्तके –
"संक्षेपात्कथ्यते धर्मः जनाः किं विस्तरेण वः ॥"

Funding: Tattva Heritage and IKS-MoE. Digitization: eGangotri.

सतां नीतयः

[1]मातृवत् परदाराणि परद्रव्याणि लोष्ठवत् ।
[2]आत्मवत्सर्वभूतानि यः पश्यति स [3]पश्यति ॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

[4]एवमनेकदृष्टान्तदर्शनात् [5]दधिकर्णेन शशकपिञ्जलौ [6]विश्वासितौ [7]निकटमागतौ । [8]तत्क्षणेन तेनापि [9]सकृदेव [10]गृहीतौ हतौ भक्षितौ च । अतोऽहं ब्रवीमि — [11]क्षुद्रमर्थपतिं [12]प्राप्य इति । [13]तत्सर्वथा [14]नायं [15]उलूकः [16]राज्यभरणे योग्य [17]इति ॥

---

(1). मातृवत्परदारांश्च परद्रव्याणि (क, च, ट), मातृवत्परदारांस्तु परद्रव्याणि (ट), मातृवत्परदारेषु पर- (ब). (2). आत्मवत्सर्वभूतानि वीक्षन्ते धर्मबुद्धयः (ल), आत्मवत्सर्वभूतेषु यः (ब). (3). पश्यति ॥ तत्किं बहुना — तौ छद्मना विश्वा- (ए), पश्यति ॥ किं बहुना — तेन क्षुद्रेण तौ छद्मना नूनं विश्वा- (ल). (4). एवं विश्वा- (अ, त), एवमुक्ते दधि- (च), एवं वदति विश्वा- (ट), एवमुक्त्वा अतीव विश्वा- (प). (5). दधिकर्णेन आत्मनो निकटीकृत्य विश्वा- (क), दधिकर्णे शशकपिञ्जलौ विश्वा- (च). (6). विश्वासात् अतिनिकटं गत्वा एकदैव तौ गृहीतौ व्यापादितौ च (अ), विश्वासात् शृण्वन्तौ तौ चरणैः मुखेन सकृदेव (क), विश्वासात् निकटीभूतौ तत्क्षणेन (च), विश्वासमुपगतौ निकटीभूतौ एकदैव तेन गृहीतौ (ट), विश्वासान्निकटीभूतौ एकदैव तेन गृहीतौ (त), विश्वासं नीतौ निकटमागतौ स एकदैव तेन गृहीतौ (प), विश्वासं नीतौ येनाङ्कमुपागतौ हतौ चेति अतोऽहं (ए), विश्वासितौ यथा तस्योत्सङ्गवर्तिनौ सञ्जातौ । ततश्च तेनापि समकालमेवैकः पादान्तेनाक्रान्तः

अन्यो दंष्ट्राक्रकचेन। ततो गतप्राणौ भक्षितौ इति। अन्तोऽयं (ल). (7). तदन्तिकमुपागतौ (य). (8). तत्क्षणेन शशकस्य कर्णं गृहीत्वा कपिञ्जलं पाणिना गृहीत्वा भक्षितश्च (य). ततश्च समकालमेकः पादेनाक्रान्तः द्वितीयो दंष्ट्राक्रकचेन। एवं द्वावपि गतप्राणौ भक्षितौ (य). (9). सकृदेव दृढं गृहीत्वा तेन हतौ भक्षितौ (क). (10). गृहीतौ गतौ भक्षितौ (य). (11). क्षुद्र-मर्थपतिं इति (अ, त), क्षुद्रं इति (ट, प). (12). प्राप्य इत्यादि (य). (13). तत्सर्वथैव राज्य- (त), तत्सर्वथा नाशयणीयगुणोपेतोऽयं तत्किमनेन इति (ट). (14). नायं राज्ये इति। तत् श्रुत्वा (अ), नायं राज्ययोग्य उलूकः। तत् श्रुत्वा (ट), नायं राज्य- (प). (15). उलूकः पट्टयोग्य इति (च). (16). राज्यभरणे न योज्यः इति (क), राज्ययोग्यौ। उलूकः — एतत् श्रुत्वा (त), राज्ययोग्यः उलूकः इति (प). (17). इति। तच्छ्रुत्वा (अ), इति तद्वाक्-भावं ज्ञात्वा विहङ्गैरालोचितम्। सर्वे च भद्र एवायं (क), इति तद्वाक्यं श्रुत्वा (च, प), इति तस्य (ट).

→ 'मातृवत्' इति पद्यमारभ्य 'विश्वासितौ' इत्यन्तं 'य' पुस्तके अन्या रीतिः। इदं च 'मातृवत्' इति पद्यं 'ल' पुस्तके आषाढ-भूति कथायां ४३४ तमं पद्यं भवति ; 'व' पुस्तके च सान्धितन्त्रे २३२ तमं पद्यमस्ति।

→ 'सत्यं' इतीदं पद्यं 'अ' पुस्तकमात्रे दृश्यते।

+ 'निकटमागतौ' इत्यनन्तरं 'तत्क्षणेन' इत्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः।

⊕ 'तत्सर्वथा' इत्यारभ्य 'अथ तस्य' इत्यारम्भ-पर्यन्तं 'य, ल' पुस्तकयोरन्या रीतिः।

अथ [1]तस्य तद्वचनं [2]श्रुत्वा– "वृद्ध रावायं [3]वायसः; अनेनोक्तमेव [4]साधु; आस्तां तावदभिषेकक्रिया;"– [5]इति [6]निश्चित्य [7]यथायथं [8]सर्वे [9]विहगाः [10]पलायिताः। [11]अथामर्षात् [12]उलूकः [13]वायसमाह,– [D]भो! दुरात्मन्! [14]किं तवापकृतं मया? [15]येन [16]राज्यं [17]समुत्पन्नं सार्वभौमं हृतं [F]त्वया!– [C]इति।

---

(1). तस्य वचनमाकर्ण्य (अ), तस्य तु तद्वचनमङ्गीकृत्य (ट), तस्य तद्वचनमाकर्ण्य (ल). (2). श्रुत्वा आह– विहगैः सर्वैश्च वृद्ध (अ), श्रुत्वा विहगैः आलोचितम्– सर्वैः वृद्ध- (अ), विहगैरालोचितम्– उक्तम् च– सर्वे भद्र रावायं (ट), विहगैः आलोचितम्– सर्वैः- कृतं च– वृद्ध- (त), विहङ्गकैः आलोचितं च– सर्वैः वृद्ध- (प). (3). वायसो निश्चित्य (अ), वायस इति तदास्तां (क), वायसः– तदास्तां (ल). (4). साधु तदास्तां (ट, प). (5). इति यथा (क, च, ट, त प), इति ब्रुवाणाः सर्वपक्षिणो यथा- (अ), इत्युक्त्वा यथा- (ट), इत्युक्त्वा (ल). (6). निश्चित्य सर्वे यथा (अ). (7). यथायथं गता विहगाः (अ, ट, त), यथा यथा सर्वे (क, च, प). (8). सर्वे गताः विहगाः (क), सर्वे पलायिताः (अ), सर्वे गताः। अथोलूकः (प). (9). विहगाः– दग्धं दावानलेनापि वाक्-क्षतं न प्ररोहति। ततः पापोपकृतं (अ), विहगाः। अथ सामर्षमुलूकः (क), विहगाः– अथा- (च, त), विहगाः– अथोलूकः (ट). (10). पलायिताः विहगाः। अथा- (ल). (11). अथामर्षात् वायसमुलूकः (अ), अथामर्षात् वायसं (त). (12). उलूक आह (च). उलूकः आह– भो! (अ), (उलूको) वायसवचनेनादीपितमनाः तमाह– (ट), उलूको वायसमाह– भो! (ल). (13). वायसं प्रत्याह- (ट, त, प). (14). किं तेऽपकृतम्? येन (अ), किं मयापकृतं भवतः? येन (ट), किं मया तेऽपकृतं यद्राज्याभिषेको मे विघ्नितः (ल). (15). येन राज्याभिषेको विघ्नितस्त्वया (अ), येन अभिषेकव्याघातः कृत इति (ट). (16). राज्यमुत्पन्नं हृतं (अ, क, ट, त). (17). समुत्पन्नं हृतं (प).

+ 'श्रुत्वा' इत्यनन्तरं 'इति निश्चित्य यथार्थं इत्यारम्भ-पर्यन्तं 'य, र, ल' पुस्तकेषु अन्या रीतिः।

⊕ 'इति' इत्यनन्तरं 'यथार्थं' इत्यस्मात् प्राक् 'ल' पुस्तके अन्या रीतिः।

→ 'पलायिताः' इत्यनन्तरं 'उलूको वायसमाह' इत्यारम्भपर्यन्तं 'य, र, ल' पुस्तकेषु अन्या रीतिः।

D→ भो! दुष्टात्मन्! इति 'य ल' पुस्तकयोः पाठः।

F त्वया इत्यनन्तरं संक्षोद्धति इत्यस्मात् पश्चात् प्राक् 'य ल' पुस्तकयोरन्या रीतिः।

C. 'इति' इति 'र' पुस्तकमात्र पाठः।

Funding: Tattva Heritage and IKS-MoE. Digitization: eGangotri.

वाक्-क्षतस्य दुर्विपाक

+[1]संरोहतीषुणा [2]विद्धं [3]वनं परशुना [4]हतम्।
[5]दग्धं दावानलेनापि वाक्-क्षतं [6]न प्ररोहति॥

⊕अतोऽयं +[7]तदाप्रभृति काकोलूकयोः [8]वैरानुबन्धः C[अभूत्]। [9]मेघवर्ण [10]आह,—E[11]तात! [12]इदानीं [13]शीघ्रमेवात्र त्वया [14]उपायः [15]चिन्त्यतां [16]यावन्नाभ्येति

---

(1). रोहति सायकविद्धं (य), रोहति सायकैर्विद्धं (ल). (2). विद्धो वृक्षः परशु- (क), विद्धं छिन्नं रोहति चासिना। वाचा दुरुक्तं बीभत्सं न (ल). (3). वनं परशु- (प). (4). हतम्। दग्धं (क), हतम्। वाचा दुरुक्तं बीभत्सं न (य, र). (5). दग्धो दावानलैः वृक्षः वाक्- (प). (6). न प्ररोहति वाक्-क्षतम्। (य, ल), न संरोहति वाक्-कृतम्॥(र). (7). तदाप्रभृति उलूककाकयोः (अ). (8). वैरमुत्पन्नम्। मेघ- (ज). (9). मेघवर्णः— इदानीं (क), मेघवर्णः— तात! (ट, त, प). (10). आह—अवगतं मयेदं तात! (र). (11). तातः इदानीं (प), तात! सम्प्रधार्यताम्—येनेह नागच्छन्ति तावत् उपायः (र). (12). इदानीं तात! शीघ्र- (क), इदानीमेवात्र उपायः (ज), इदानीं मे कोऽभ्युपायः (ट), इदानीं राकोपायः (त), इदानीमेव कोऽभ्युपायः (प). (13). शीघ्रमेवोपायः (क), (14). उपायः उद्दिश्यताम् (क). (15). चिन्त्यताम्— असावाह (र). (16). यावन्नायाति (अ).

+ संरोहति इति पद्यमारभ्य 'तदाप्रभृति' इत्यारम्भपर्यन्तं 'अ' पुस्तके नास्ति। एवं 'संरोहति' इति पद्यानन्तरं—'मेघवर्ण आह' इत्यारम्भपर्यन्तं 'य' 'व' पुस्तके, 'काकोलूकयो' इत्यारम्भपर्यन्तं 'र' पुस्तके, 'तदा प्रभृति' इत्या- 'ल' पुस्तके चान्या रीतिः।

⊕ 'अतोऽयं' इति 'त' 'प' पुस्तकयोः पाठः।

⊢ 'तदाप्रभृति' इत्यनन्तरं 'मेघवर्ण आह इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

C 'अभूत्' इति 'क' पुस्तकमात्र पाठः।

E 'तात' इत्यनन्तरं 'बहवो' इति पद्यारम्भपर्यन्तं 'य' 'ल' [illegible] पुस्तकयोरन्या रीतिः।

[1]रजनी । [2]चिरजीव्याह — +[3]स्वामिन् ! ⊢[4]सन्धिविग्रहौ[11] [5]तावदुभावपि [6]निराकृतौ । अधुना [7]तावत् [8]यानासनद्वैधीभावसमाश्रयाः →विचार्यन्ताम् । [9]तत्र आसनं [10]बलीयसि [11]विद्वेषिणि निषिद्धम् । यानं [12]स्थानस्य [13]आत्मनः विनाशाय द्वैधीभावश्च

---

(1). रजनी । स आह (अ), रजनी । असावाह (च). (2). चिरञ्जीवी (क, ट, त, च). (3). स्वामिन् इति सन्धि- (च). (4). सन्धिविग्रहौ निराकृतौ यानासन- (त), सन्धिविग्रहावुभावपि अनिराकृतौ । यानासन- (प). (5). तावत् निराकृतौ (अ), तावन्निराकृतौ । यानासन- (च), तावत् निराकृतौ । यानं स्थानस्य आत्मनश्च परित्यागाय । तत्र (ट). (6). निराकृतौ तावदासन (अ), निराकृतौ आसन्नं बली- (क). (7). तावदासन यान द्वैधीभाव समाश्रयाः विचार्यन्ताम् (अ), (8). यानासनद्वैधीभावसमाश्रयाः चिन्त्यताम् । एकत्र स्थानं च परिकल्प्यते तत्र (क), यानासनद्वैधीभावसमाश्रयाः चिन्त्यताम् । तत्र कल्प्यते तत्र (त), यानासनद्वैधीभावसमाश्रयाः विचिन्त्यताम् (प). (9). तत्र दानं बलीयसि (अ). (10). बलीयसी न विद्वे- (क). (11). विद्वेषिणि । स्थानस्य (अ), विद्विषि । स्थानस्य (क), विद्विषि निषिद्धम् (च), विद्विषि निषिद्धम् द्वैधीभावश्च (ट), विद्विषि । यानं स्थानस्य (त). (12). स्थानात् आत्म- (च). (13). आत्मविनाशाय यानं च त्यागाय बली- (अ), आत्मविनाशाय यानद्वैधीभावश्च बली- (क), आत्मविनाशः यानं च परिधावनं बली (च), आत्मनः विनाशाय यानं च परित्यागाय कल्प्यते बली- (त).

+ 'स्वामिन्' 'सन्धिविग्रहौ' इत्यनयोर्मध्ये 'र' पुस्तकेऽन्या रीतिः ।

⊢ 'सन्धिविग्रहौ' इत्यनन्तरं 'अधुना तावत्' इत्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः ।

→ 'विचार्यन्तां' इत्यनन्तरं 'स तु शरीरव्ययेनापि * मया' इत्यारम्भपर्यन्तं 'प' पुस्तके नास्ति ।

Funding: Tattva Heritage and IKS-MoE. Digitization: eGangotri.

[1]बलीयसि प्रवृद्धेन [2]प्रत्यासन्नेन रिपुणा सह [3]कार्यः कालमपेक्षते । अत एव संश्रयः [4]चिन्त्यताम् । [5]स तु [6]शरीरव्ययेनापि [7]मया [8]प्रयत्नेन [9]अनुष्ठेयः । उक्तञ्च—

छलोपायाश्रयात् कार्यसिद्धिः

[10]बहवो बलवन्तश्च कृतवैराश्च [11]शत्रवः ।
[12]बुद्ध्या [13]वञ्चयितुं [14]शक्या [15]ब्राह्मणं [16]छागलादिव ॥

[17]मेघवर्ण आह— [18]कथमेतत् ? [19]चिरजीवी अब्रवीत्—

---

(1). बलीयसा प्रत्या- (अ, त), बलीयान् प्रत्या- (क), बलीयसा प्रवृद्धेन आसन्नेन सह (च), बलीयसि प्रत्या- (ट). (2) प्रत्यासन्नेन सह (अ, त), प्रत्यासन्नेन रिपुणा सह (क), प्रत्यासन्नविधेयः रिपुणा अतः समाश्रयः (ट). (3). कार्यः । अत्र संश्रयः (अ), कार्या । अथ संश्रयः (क), कालमपेक्षते । अत एव समाश्रयः (च), कालमुपेक्षते । अतः समाश्रयः (त). (4). चिन्त्यताम्— शरीरव्ययेनापि मया (ज). (5). स च शरीर- (ट), (6). शरीरव्ययेनापि सर्वथा प्रयासप्रयत्नेन (अ). (7). मया सर्वथा अनु- (क). (8). प्रयत्नात् अनु- (ट, त), प्रयत्नेनापि अनु- (प). (9). अनुष्ठातव्यः— उक्तञ्च (क, त), अनुष्ठातव्यम् । बहवो (च), अनुष्ठेयः । बहवो (प). (10) बहुबुद्धिसमायुक्ताः सुविज्ञाताः बलोत्कटाः । शक्या वञ्च- (य), बहुबुद्धिसमायुक्ताः सुविज्ञाता बलोत्कटान् । शक्या वञ्च- (ल). (11). शत्रवः शक्या वञ्च- (ट, त), तत्र तावन्निश्चयितुं बुद्ध्या ब्रा- (प). (12). बुद्ध्या सञ्चयशीलस्य ब्रा- (अ). (13). वञ्चयितुं बुद्ध्या ब्रा- (त), वञ्चयितुं धूर्ताः छागकब्राह्मणं यथा । मेघ- (य), वञ्चयितुं प्राज्ञ ब्रा- (र), वञ्चयितुं धूर्तो ब्रा- (ल). (14). शक्या ब्रा- (क, च). (15). ब्राह्मणगलादिव ॥ राजा— सोऽब्रवीत् (त), ब्राह्मणं छाग- (र, ल). (16). छागलादिव ॥ स आह— कथ- (अ), छागया इव ॥ मेघ- (च), छागका इव ॥ मेघ- (ट), छागकादिव ॥ मेघ- (प), छागलादिव ॥ सोऽब्रवीत्— कथ- (र). (17). मेघवर्ण- कथ- (क, च, ट, प). (18). कथमेतत् ? आस्ति (अ), कथमेतदिति ? चिर- (च) कथमेतत् ? चिर- (ट, प), कथमेतत् ? सोऽब्रवीत्— कस्मि- (य, ल), कथमेतत् ? चिर- (र). (19). चिरञ्जीवी— आस्ति (क, ट), चिर- कस्मि- (च), चिरञ्जीवी आह— आस्ति (प, र).

छलेत्रयाणां धूर्तानां ब्राह्मणस्य च कथा-६

अस्ति [1]कस्मिंश्चित् नगरे मित्र-शर्मा [2]नाम +[3]ब्राह्मणः। [4]इयक्षुः सः [5]छागमादाय [6]गच्छन् [7]मध्येमार्गं कैश्चित् धूर्तैः दृष्टः। [8]तैः चिन्तितम्— '[9]अयमस्माभिः ब्राह्मणः छागतः त्याजयितव्य[10]' इति। [11]तत्र [12]एकेन [13]कथितम्— "[14]अहो ⊢दुश्चरितं ब्राह्मणस्य! ⊕कथमुत्तम-जातिः कुक्कुरं वहति"— [15]इति।

---

(1). काश्चित् ब्रा- (अ, ट, त, र), कस्मिंश्चित् ब्रा- (क, प, ल), कस्मिंश्चित् त्रिदशानगरे ज्वलनो नाम (च), कस्मिंश्चिदधिष्ठाने मित्र-(ल). (2). नाम विप्रः इयक्षुः (च). (3). ब्राह्मणः। यज्ञार्थी छाग- (अ), ब्राह्मणश्च यागार्थं छाग-(ट), ब्राह्मणः यागार्थी छाग-(त), ब्राह्मणः। स च यागार्थी छाग (प). (4). इयक्षुः सः छाग-(क), इयक्षुः छाग (ख). (5). छागमादाय मध्ये (त). (6). गच्छन् धूर्तैः (अ), गच्छन् पथि दुष्टैः धूर्तैः (क), गच्छन् कैश्चित् धूर्तैः (च). (7). मध्येमार्गं धूर्तैः (ट, त, प). (8). चिन्तितम्— ब्रा-(अ, च), चिन्तितं च— ब्रा-(ट, त, प). (9). ब्राह्मणः छागः त्यज्यतां इति (अ), ब्राह्मणः छलेन छागं त्याजयितव्यम्— इति (क), ब्राह्मणस्य छागं गृहीनुमालोच्य तत्र (ज), ब्राह्मणो छागः त्याजयितव्यः (ट), ब्राह्मणः अयं छागतः *** त्वमनादृत्यागच्छत्— किञ्चिदुपेत्यापरेणागत्य पृष्टः— विप्र! किमयं छागो गृहीतः। तमप्यवमत्य व्रजति (त), ब्राह्मणस्तु छागः त्यज्यताम्— इति (प). (10). इति संमन्त्र्य तत्र (ट, प). (11). तत्र च एकेन (च). (12). एकेनागत्याभिहितम्— इदमहो (अ), एकेनागत्य कथितम् (क, ट), एकेन पुरत आगत्य तस्मिन्नुक्तम्— विप्र किमिदं छागमिति सारमेयः उह्यते इति (च), एकेनागत्यास्मिन्नुक्तम्— ब्राह्मणः किमभूत्? स्कन्धे नोह्यते। ततस्त-(ल). (13). कथितम्— ब्राह्मण किम *** कर्णेन उह्यते। ततस्त-(ट). (14). अहो! अद्भुतम्। कथमुत्तम-(अ). (15). इत्युक्त्वा गते तद्वचनमनादृत्य विप्रो गतवान् (अ).

+ 'ब्राह्मणः' इत्यनन्तरं 'अतोऽहं ब्रवीमि— बहवो' इत्यारम्भपर्यन्तं 'य, र, ल' पुस्तके-ध्वन्यावीति।

⊢ 'दुश्चरितं ब्राह्मणस्य' इति 'क' पुस्तकमात्रपाठः।

⊕ 'कथमुत्तमजातिः कुक्कुरं वहति" इति 'अ' पुस्तकमात्रपाठः।

+[1] ततस्तमनादृत्यासौ[11] विप्रो [2]गतवान् ।
[3]किञ्चिद्दूरमतीत्य [4]अपरेण कथितम् - कथमुत्तम-
जातिः स्कन्धे कुक्कुरं [5]वहति ? इति । ततो ब्राह्मणः
तमप्यनादृत्य [6]व्रजति । ततः [7]पुनरन्येनाभिहितम् -
[8]कथमयं ⊢[9]उत्तमजातिरपि क्रूरवृत्तिं करोति ; कुक्कुरं
वहति ; इति ।

---

(1). ततस्तमप्यनादृत्यासावगच्छत् - अपरेण (च), ततस्तमना-
दृत्यासावगच्छत् - किञ्चिद्दूर- (ट, प). (2). गतवान् । पश्चात् अन्यैरागत्योक्तम् - कथं भोः स्कन्धे (अ). (3). किञ्चिद्दूरमुपेत्य (ट). (4). अन्येनागत्य
पुनः कथितम् - ब्राह्मणः सद्योग्यस्सन् किमेवं ननु कष्टम् । ततोऽ-
परेणाभिहितम् (क), अपरेणागत्योक्तम् - द्विज । किमपि श्वानं
गृहीत्वागच्छते छागमिति । इति तमप्यवगत्य गच्छति । ततः पुनः
(च), अपरेण पृष्टः - विप्र ! किमर्थं श्वानं गृहीतवान् ? तमनादृत्य
व्रजति (ट), अपरेणागत्यास्मिन् उक्तम् - ब्राह्मण किमर्थं श्वानं गृहीतः
ततस्तमप्यनादृत्य (प). (5). वहति । अतो ब्राह्मणः शशङ्के ! सर्वैरेव-
मुक्तम् । प्रायेण (अ). (6). व्रजति सति तस्मिन् पुनः (ट, प), व्रजति
पुनः (त) (7). पुरन्येनागत्य भाषितम् - अहो ! चरितं ब्राह्मणस्य !
कथमयं (च), पुनरन्यैरागत्य भाषितम् - अहो ! चरितं ब्राह्मणस्य
कथमयं (ट), पुनरन्यैश्चागत्य भाषितम् - कथमुत्तमजातिः कुक्कुरं
वहति । तत आत्मनः (त), पुनरन्यैश्चागत्य भाषितम् - अहो ! चरितं
ब्राह्मणस्य ! कथमयं (प). (8). कथमुत्तमजातीयोऽयं राकं कुक्कुटं हरति ।
ब्राह्मणः (क), कथमयमुत्तमजातिरपि कुक्कुरं वहति (ट). (9). उत्तम-
जातिः कुक्कुरं (प).

+ 'ततस्तं' इत्यस्य पदस्य पूर्वस्थितात् 'इति' इत्यस्मादारभ्य "अन्येनाभि-
हितम्" - इत्यारम्भपर्यन्तं 'क' पुस्तके नास्ति ।

⊢ 'उत्तमजातिरपि क्रूरवृत्तिं करोति ; अस्पृष्टं श्वानं वहति,'
इति 'च' पुस्तकपाठात् 'उत्तमजातिरपि क्रूरवृत्तिं करोति,' इति
भाग उद्धृत्य मन्थेऽस्मिन् संयोजितः ।

ततो [1]ब्राह्मणः [2]चिन्तयामास–
[3]आत्मनः [4]प्रायेण [5]इन्द्रियाणि [6]विकलानि ;
+अन्यथा →सर्वेषां वाक्यं अनृतं न स्यात्–

[यतः]–

---

(1). ब्राह्मणः अचिन्तयत्– आत्मनः (प). (2). चिन्तयामास। प्रायेण (क), चिन्तयामास प्रियाणि विकलानि (च). (3). आत्मनः इन्द्रि- (ट, त). (4). प्रायेण मम इन्द्रि- (क). (5). इन्द्रियाणि जानि विकलानि वा इति नास्ति सर्वेषामेषां बुद्धिरन्यथा (क). (6). विकलानि सर्वेषां सदा यत्र ये स्यात्तत्र न बाध इत्याशङ्क्य, सर्वेषां (अ), विकलानि मम मतिभ्रष्टोऽहं इत्यालोच्य (च).

+ "अन्यथा न अत रातं द्रक्ष्यामि" ~~सर्वेषां~~ इति 'सर्वेषां' इत्येतत्पदप्राग्वर्तिपाठात् 'अन्यथा' ~~इति~~ इति भाग उद्धृत्य शुद्धपाठे सङ्कलितः।
→ 'सर्वेषां वाक्यमनृतं न स्यात्' इति 'अ' पुस्तकमात्रपाठः।

लोकाभिप्रायस्य विचारणीयता

सर्वेषां सर्वदा यस्य [1]धीस्स्यादेकैव यत्र तु ।
[2]विचारणीया विद्वद्भिः नैव नित्यानुवर्तिभिः ॥

इत्यालोच्य छागं [3]त्यक्त्वा [4]गतः। ततस्तैः धूर्तैः छागो गृहीत्वा [5]भक्षितश्च । अतोऽहं ब्रवीमि — [6]"बहवो बलवन्तश्च" — [7]इति ।

---

(1). धीस्स्यादेकैव तत्र विचा- (ट), धीर्यदेकैव (त), धीः स्यात् एकैव तत्र (प). (2). विचारणीयं विद्वद्भिर्नित्यं न्यायानुवर्तिभिः (ट), विचारणीयं विद्वद्भिः ×××× (त). (3). त्यक्त्वा स्नानं गतः (अ, च, ट, त), त्यक्त्वा ×××× णस्थानं गतः (क), त्यक्त्वा स्नानार्थं गतः (प). (4). गतो धूर्तैः (अ, त, प), गतः। ततस्तैः धूर्तैः (क), गतः। अतोऽहं (च), गतो धूर्तैश्च छागो (ट). (5). भक्षितः — अतोऽहं (अ, ट, त, प). (6). बहुबुद्धिसमायुक्ता इति (य, ल). (7). इति । ततो धूर्तैः भक्षितश्च । [illegible]। तत- (ज).

+[1]तत्र [2]यूयं पर्वतशृङ्गं गत्वा तत्रैव [3]सावधाना आवसथ। अहं चात्मानं [4]लुञ्चितशरीरं कृत्वा [5]पूर्वं हतानां वायसानां रुधिरेण [6]अवलिप्य मां तिष्ठामि। तत्र चाहं [7]शत्रुसंशयं [8]कृत्वा [9]विपन्निस्तरणार्थं चिन्तयामि ⊕इति।

---

(1). तदत्र लुञ्चित- (अ), तदात्मानं (च), तस्मात् यूयं ऋष्यशृङ्ग-पर्वतमधिरुह्य आवास्थिमथ अहं (प). (2). यूयं ऋष्यशृङ्गपर्वतं अधिरुह्य आवसथ (ट), तत् यूयं ऋष्यशृङ्गपर्वतं अहं (त). (3). सावधाना भवत। मां लुञ्चित- (क). (4). लुञ्चितशवशरीरं (क), लुञ्चितपक्षशरीरं (च). (5). पूर्वहतानां रुधिरेण (अ, ट, त, प), पूर्वहतानां वायसानां (क), पूर्वहतानां काकानां (च). (6). अवलिप्य यूयं पर्वतः अहं च शत्रु- (अ), अवलिप्याहं (क), अवलिम्प मां तिष्ठामि ऋष्यमूकगिरिशृङ्गं आरुह्य यूयं वलयितमुखाः भवत। अहं शत्रु- (च), अवलिम्प शत्रु- (ट, त, प). (7). शत्रुसंशयं गत्वा (अ), शत्रुसंशयं गत्वा तद्विपत्तेः तरणादिकं चिन्तयामि (ट, प), (8). कृत्वा तद्विपत्तेः तरणादिकं चिन्त- (त). (9). विपन्निस्तरणार्थं चिन्त- (अ), विपत्तेः तरणादिकं चिन्त- (क), विपत्तेः तरणार्थं चिन्त- (च).

+ 'तत्र' इति 'क' 'च' पुस्तकयोर्न दृश्यते। एवं 'तत्र' इत्यारभ्य ~~[struck out]~~। 'तथा च- अनारम्भो' इत्यारम्भपर्यन्तं 'य' पुस्तके, 'तथा चानुष्ठिते' इत्यारम्भपर्यन्तं 'र' पुस्तके, 'अनारम्भो' इति पद्यारम्भपर्यन्तं 'ल' पुस्तके चान्या रीतिः।

⊕ 'इति' इति 'च' पुस्तकमात्रपाठः।

[1]तथा चानुष्ठिते [2]अस्तङ्गते +[3]भगवति [4]सवितरि ⊕अरिमर्दनः ससैन्य आगत्य तत्र [5]न्यग्रोधपादपारूढं [6]वायसकुलं [7]▷नापश्यत्; →स केवलमेकः ~~[struck out]~~ किङ्कर्तव्यतामूढ †इवासीनः [7][1]तैः Fदृष्टः चिरञ्जीवी।

---

(1). तथा कृते अस्त- (अ), तथा अनुष्ठिते (क, च), तथा चानुष्ठितमनन्तरं अस्त- ~~[struck out]~~ (ट, त, प). (2). अस्तमिते (अ), अस्तङ्गतः सविता आमर्दनस्य सैन्यं आगत्य (च). (3). भगवति स चरति पुनश्चावगमत् वने ससैन्यं आगत्य (क). (4). (सवितरि) उपमर्दन उलूकवल्लपरिवृत आगत्य (अ), सवितरि आमर्दनः ससैन्यं आगत्य (ट), सवितरि आमर्दः तस्मिन् न्यग्रोध (त), सवितरि सति पुनश्चामर्दसैन्यं आगत्य (प), सवितरि असौ अपमर्दः ससैन्यपरिवारः तत्रैव न्यग्रोध- (र). (5). न्यग्रोधवृक्षाधिरूढः सन् वायस- (अ), न्यग्रोधे वायस (क), न्यग्रोधपादपमारुह्य वायस- (च), न्यग्रोधपादपं आरूढं (ट, प), न्यग्रोधमारूढः; न च तत्र कश्चिदपि वायसं पश्यति (र). (6). वायसकुलं अव- (अ). (7). सर्वैः ~~[struck out]~~ दृष्टं अचिन्तयत् — अनारम्भो (अ).–

+ 'भगवति' इति 'क' पुस्तकमात्रपाठः।

⊕ उलूकानां राज्ञः 'अरिमर्दनः' इति अस्य तन्त्रस्यादिनः प्रदत्तं 'अ' पुस्तकपाठमनुरुध्य सर्वत्र 'अरिमर्दन' इत्येव पाठस्संयोजितः।

▷ 'अपश्यत्' इत्यनन्तरं 'ततोऽसौ' इत्यारम्भपर्यन्तं 'च, ट, त, प' पुस्तकेषु नास्ति; 'र' पुस्तके त्वन्या रीतिः।

→ 'स' इत्यारभ्य 'किङ्कर्तव्यतामूढ' इत्यन्तं 'अ' पुस्तकमात्रपाठः।

† 'इवासीनः तैः' इति 'क' पुस्तकमात्रपाठः।

F 'दृष्टः चिरञ्जीवी' इति 'क' पुस्तकमात्रपाठः।

Funding: Tattva Heritage and IKS-MoE. Digitization: eGangotri.

[1] ततोऽसौ ⊕ चिरञ्जीवी [2] अचिन्तयत्—

तथा च—

बुद्धेर्विशेषः

+[3] अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम् ।
[4] आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥

[5] इति [6] चिन्तयित्वा चिरजीविना [7] शब्दः [8] कृतः।

---

(1). ततोऽसावचिन्तयत् (क,न), तेन चिरजीविना चिन्तितम्। अनारम्भो (ग), ततोऽसौ अचिन्तयत्— अनारम्भो (ल). (2). अचिन्तयत्— अनारम्भो (ट). (3). अनारम्भो हि कार्याणां प्रथमं (य,ल), अनारम्भस्तु कार्याणां प्रथमं (ढ). (4). आरब्धास्यागमने द्वितीयं (क), प्रारब्धस्यान्त- (य,ल). (5). इति विचिन्त्य चिर-(अ,क), इति विचिन्तयित्वा नादं कृतः (ट), इति विचार्य मन्दं मन्दं शब्दं अकरोत् (य,ल). (6). चिन्तयित्वा शब्दः (च), चिन्तयित्वाति- नादः कृतः (त,प), अनुचिन्त्य मन्दं मन्दं शब्दं वाशितवान् (र). (7). शब्दितम्। तथा तदनुसारिभिः उलूकैः आगत्य (क), (8). कृतः। तेनोक्ताशब्देन ज्ञात्वा (अ), कृतः। तं श्रुत्वा विस्मिताः (च).

⊕ 'चिरञ्जीवी' 'अचिन्तयत्' इत्यनयोः पदयोर्मध्ये 'र' पुस्तकेऽन्या रीतिः।

+ 'अनारम्भो' इति पद्यानन्तरं विद्यमानात् 'इति' इत्य- स्मात् प्राक् 'य.ल' पुस्तकयोः, 'चिन्तयित्वा' इत्यारम्भपर्यन्तं 'र' पुस्तके चान्या रीतिः।

[+]ततस्तेन [1]शब्देन तं [2]ज्ञात्वा विस्मिताः कौशिकभटाः चिरजीविसमीपं [3]आगत्य [4]नीत्वा अरिमर्दनाय [5]समर्पितोऽसौ पृष्टः— कस्त्वं— [6]इति। तेनोक्तम्— [7]अहं मेघवर्णस्य मन्त्री चिरञ्जीवी [+]इति।

[8]तच्छ्रुत्वासौ [9]विस्मितः प्राह [10]चैनम्— अहो! त्वं तस्य [11]प्रधानामात्यः खलु? इदानीं कथमिमां [12]दशां [13]आपन्नः इति।

---

(1). शब्देन गृहीत्वा उलूकैरागत्य आमर्दने समर्पितः। तेन चासौ पृष्टः (ट), शब्देनासौ गृहीत्वा उलूकैः आमर्दने समर्पितः। तेन चासौ पृष्टः (त, प), (2). ज्ञात्वागत्योलूकैः ज्ञात्वानीय उपमर्दनाया र्पितः। तेन पृष्टम्, कस्त्वम् (अ). (3). आगत्य कस्त्वम् (च). (4). नीत्वा आमर्दनाय समर्पितम्। तेन च पृष्टः (क). (5). असावकथयत्। अहं (र). (6). इति। काकः— अहं चिरञ्जीवी। तच्छ्रुत्वा (क), इति चिरजीवी आह— अहं (ल), इति अनेनोक्तम्— अहं चिर- (ट), इति। अनेन चोक्तम्— चिर- (त), इति। अनेन चोक्तम्— अहं (प). (7). अहं चिर- (अ, प), अहं चिरजीवी (र). (8). तच्छ्रुत्वा विस्मितः (च), तच्छ्रुत्वामर्दः परं विस्मयमगमत् आह च— (र). (9). विस्मित. आह- त्वं (अ), विस्मित आह— अहो (क). (10). चैनं त्वं (च, त, प). (11). प्रधानामात्यः कथमिमां (अ), प्रधानमन्त्री कथमिमां (क), प्रधानमन्त्री खलु? कथमिमां (च), प्रधानमन्त्री इदानीं (ट, च), प्रधानमन्त्री। इदानीं त्वरितं कथामिमां (त). (12). दशामुपगतोऽसि इति। काकः— देव! (क) दशामुपगतोऽसि। तेनोक्तम्— मया (ल), दशामुपगतोऽसि। काकः— देव! (ट), दशां कथमुपगतोऽसि। तेनोक्तम्— देव (त), दशामुपागतोऽसि। तेन चोक्तम्— देव (प). (13). आपन्नः रावं (अ).

+ 'ततस्तेन' इत्यारभ्य 'रावं श्रुत्वा उलूकराजः' इत्यारभ्य पर्यन्तं 'म' पुस्तके, अतैव- 'उलूकराजः' इत्यारभ्यपर्यन्तं 'ल' पुस्तके

'समर्पितोऽसौ' इत्यत्र— 'असौ' इत्यारम्भपर्यन्तं 'र' पुस्तके चान्या रीतिः।

+ 'इति' इत्यनन्तरं 'तच्छ्रुत्वा' इत्यस्मात् पूर्वं 'च' पुस्तके अयमधःप्रदर्शितो ह्यधिको भागः प्रदृश्यते—

"ततस्तं भटैः आमर्दसमीपं गमितः।
आमर्दः— 'कस्त्वम्' इति। तेन पुरुषः
स आह"—

→ 'अहो' इत्यारभ्य 'देव! मन्त्रयता मया' इत्यत्र 'मन्त्रयता' इत्यारभ्य-पर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

एवं [1]श्रुत्वा तेन चोक्तम्— देव! [2]मन्त्रयता [3]मया इदमभिहितम्— [4]यत् अयं तु [5]बलवान् अरिमर्दनो [6]उलूकराजः। अतः प्रणम्यताम्— [7]इति।

+इत्युक्तमात्र एव [8]अहं [9]शत्रुपक्षपाती [10]इत्युक्त्वा इमां [11]दशां उपनीतो वायसैः इति।

---

(1). श्रुत्वा स मन्त्री इदमुक्तम्— यत् (अ). (2). मन्त्रयता इदमभि- (त,प). (3). मयायमभिहितः। अयं तु (क,ट), मया अभिहितम्— अयं तु (त), मया अभिहितम्— मे बल- (ट), मया अभि- (ल). (4). यत् बल- (अ). (5). बलवान् उपमर्दनः तत् प्रणम्यताम्— (अ), बलवान् नाम उलूकराजः (क), बलवान् आमर्द उलूकराजः (च,त), बलवान् उलूकराजः (ट), बलवान् आमर्दः अतः (त), बलवान् अतः (प). (6). उलूकराजः प्रणम्यताम् (क), उलूकराजः प्रणामः क्रियताम् इति (च). (7). इति। अतः अहं शत्रु- (अ,क,ट,त,प). (8). अहं त्वत्पक्षपात इति मत्वा निर्वेद्यैरिमां दशां (ट). (9). शत्रुपक्षपात इत्युक्त्वा (च). (10). इत्युक्त्वा काकैः इमां दशां (अ), (11). दशां नीतो वायसैः (अ), दशां उपगतो वायसैः (च,त), दशां उपानीतो वायसैः (प), दशां प्रापितः। तच्च श्रुत्वा (ट).

→ 'बलवान्' इत्यनन्तरं 'अहं शत्रुपक्षपाती' इत्यारम्भ-पर्यन्तं 'ट' पुस्तकेऽन्या रीतिः।

+ 'इत्युक्तमात्र एव' इति 'च' पुस्तकमात्रपाठः।

सहजमित्रस्य भाग्यैकलभ्यत्वं तस्यैवापत्सहायकत्वं च

+ [1]स्वभावजं [2]तु यन्मित्रं [3]तद्भाग्येनैव जायते।
[4]तदकृत्रिमसौहार्दं आपत्स्वपि न मुञ्चति ॥

मित्रविस्रम्भस्य निरन्तरता

⊕ न मातरि न दारेषु न [5]सोदर्ये न [6]चात्मजे।
[7]विस्रम्भस्तादृशः पुंसां यादृङ्मित्रे [8]निरन्तरम् ॥८४॥

---

(1). सम्भावयन्तु यन्मित्रं (अ, क), स्वभावजान्तु यन्मित्रं (च, साह्नि-(2). हि यन्मित्रं (ख). (3). तद्भाग्येनैव (अ), तत्सौभाग्ये- (क), तत्सदी-न्याय जायते (व). (4). तदकृत्रिमसौहार्दात् आप- (अ, च), तदतिक्रान्त्वा सौहार्दं (क, ट, त, प). (5). सौन्दर्ये (अ, क, ट, त). (6). राजनि। वि-(क), चात्मनि। (प, व). (7). विश्रामस्तादृशः (अ, च, ट), विश्रमस्तादृ (त), विश्रम्भ (य, ल), विश्वासस्तादृशः (व). (8). निरन्तरः॥ स्वकर्म-(अ), निरन्तरे॥ स्वकर्म- (ट, त, य), स्वभावजे॥ स्वकर्म- (व).

+ 'य' पुस्तके "स्वभावजं" इत्येतत्पद्ये पूर्वोत्तरार्धयोर्विपरि-णामो दृश्यते, तथा पूर्वार्धस्तु अधःप्रदर्शितरीत्या सर्वात्मना ~~विपरिणामितः~~ :—

"यतोऽत्र कृत्रिमं मित्रं लभ्यते न स्वभावजम्" इति 'स्वभावजं' इति पद्यमारभ्य 'कायस्सन्निहितापाय' इति पद्यारम्भप 'र' पुस्तकेऽन्या रीतिः। 'स्वभावजं' इति पद्यं 'ल' पुस्तके न दृश्यते

⊕ "न मातरि" इति पद्यानन्तरं 'कायस्सन्निहितापायः' इति प 'च' पुस्तके दृश्यते।

"न मातरि" इति पद्यस्य "स्वकर्म" इति पद्यस्य च मध्ये 'व' पुस्तकेऽन्या रीतिः।

"न मातरि" इति पद्यानन्तरं "क्षते प्रहारा" इति पद्यारम्भ-पर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

पुण्यपापफलानां अनिवारणीयता

+[1] स्वकर्मसन्तानविचेष्टितानि
[2] कालानुवर्तीनि शुभाशुभानि ।
[3] इहैव [4] दृष्टानि [5] मयार्जितानि
[6] जन्मान्तराणीव [7] दशान्तराणि ॥ ८५॥

सर्वस्यापि लोकस्य क्षणभङ्गुरत्वम्

⊕[8] कायस्सन्निहितापायः सम्पदः [9] पदमापदाम् ।
[10] समागमास्सापगमाः [11] सर्वमुत्पादि [12] भङ्गुरम् ॥ ८६॥ सन्निदी-

---

(1). स्वकर्मसन्तावविचेष्टितानि (अ, ट१, त), मांसा ×××× न्यापि गत्वा विचेष्टितानि (क). (2). कल्पान्तरावर्ति शुभा- (अ, क, त), कालानुवर्तीनि शुभा- (ज), लोकान्तरं प्राप्य शुभा- (थ), कालान्तरावर्ति शुभा- (ढ). (3). मयैव दृष्टा नियमार्जितानि (क). (4). दृष्टा न मयार्जितानि (त). (5) मया चितानि (अ), मया बहूनि जन्मान्त- (ट, प), मयाचलानि जन्मान्त- (थ), मयैव तानि (ढ). (6). ×××× न्तराणीव (ट). (7). जन्मान्तराणि (प), दशान्तराणि ॥ साधु चेदमुच्यते— काय- (थ), दशान्तराणि ॥ अथवेत्थमेवैतत् — काय- (ढ). (8). कायस्सन्निहितापायसम्पदः (अ, क, च, ट, त). (9). पदपादपाः । समा- (क), परमापदः । समा- (ज). (10). समास्सापगमाः (च). (11). सर्वमुत्पादभङ्गुरम् ॥ (ट). (12). क्षणभङ्गुरम् ॥ (ज).

+ 'स्वकर्म' इतीदं पदं 'च' पुस्तके न दृश्यते ।
⊕ "कायस्सन्निहितापायः" इत्यस्य पदस्य "क्षते प्रहारा" इति पदस्य च मध्ये 'ट' पुस्तकेऽन्या रीतिः ।

छिद्रेषु अनर्थबाहुल्यम्

+[1] क्षते [2] प्रहारा [3] निपतन्त्यभीक्ष्णं
[4] अन्नक्षये [5] दीप्यति [6] जाठराग्निः।
आपत्सु वैराणि [7] समुद्भवन्ति
[8] छिद्रेष्वनर्था [9] बहुलीभवन्ति ॥८८॥

मित्रस्य शक्तिः तस्य अनर्घ्यता च

⊕[10] शोकारातिभयत्राणं [11] प्रीतिविस्रम्भभाजनम्।
[12] केन मित्रमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥८९॥

सन्नि-
दी-
गत्वा

---

(1). क्षते प्रहारे निप- (क). (2). प्रहाराणि भवन्त्यभीक्ष्णं (प). (3). [पत]न्ति तीक्ष्णं (अ), निपतन्ति तृष्णा धनक्षये (त), प्रपतन्ति तीव्रा अन्न- (य). (4). धनक्षये (क, ट), धान्यक्षये (च), यात्यक्षये (प). (5). कुप्यति (क, च, ट), वर्धति (ल) ~~जाठरोऽग्निः (प)~~. (6). जाठरोऽग्निः (प). (7). समुच्छलन्ति (य). (8). ×××× नर्था (क), क्षुद्रेष्वनर्था (त, च), वामे विधौ सर्वमिदं नराणाम् ॥ (ल). (9). बहवो भवन्ति (प). (10). शोकाराति भयत्राण प्रीति (अ, ट), शोकार्तिभयसंत्राणं (व). (11). प्रीतिविश्रम्भ (व). (12). केन सृष्टमिदं रत्नं मित्र- (क, त), केनेदं सृष्टममृतं मित्र- (च, ट), केनेदं निर्मितमहो मित्र- (प).

+ "क्षते प्रहारा" इत्ययं 'ल' पुस्तके लब्धप्रणाशतन्त्रे ६२तमः श्लोकः। अयं च श्लोकः 'य' पुस्तके "शकस्य दुःखस्य" इति अस्यैव तन्त्रस्य ८१तमश्लोकानन्तरं परिदृश्यते। अयमेव श्लोकः 'व' पुस्तके नास्ति।

⊕ "शोकाराति" इति ~~श्लोक~~ श्लोकमारभ्य हिरण्यक- "इयत्ताङ्ग लघुपतनकावाह" इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

+[1]इति [2]बहुधा विलप्य [3]⊕हिरण्यकश्चित्राङ्ग-लघुपतनकावाह— [4]यावदेव [5]लुब्धको [6]वनान्तरात् न [7]निस्सरति [8]तावदेव [9]मन्थररक्षणोपायः चिन्त्यताम् ⊢इति । ⊳तावूचतुः—

⊳⊳आवां न किञ्चिदपि जानीवः; सर्वमेव भवान् जानाति; त-[E][10]त् किं क्रियतां; [F]इति ।

---

(1). एवं बहु विलप्य (च). (2). बहु विलप्य (ब). (3). हिरण्यकोऽब्रवीत् (घ), हिरण्यक आह— तद्यावदेष मन्थरको दृष्टिगोचरात् न नीयते तावदस्य मोक्षोपायः (ल). (4). यावन्न लुब्धो वनात् निर्गच्छति तावत् मित्रमन्थरमोक्षोपायः (अ), यावदेव वनाल्लुब्धको न निस्सरति (ह), यावदयं व्याधो वनान्न निस्सरति (ब). (5). लुब्धको निस्सरति-सन्निधौ-लुब्धको वनात् निस्सरति (त), लुब्धको न निस्सरति (प). (6). वनान्तं गत्वा न तरति तावदेव (क). (7). निस्सरति देव मन्दररक्षणोपायः (प). (8). तावत् मन्थरं मोचयितुं यत्नः क्रियताम् । तावूचतुः— (ब). (9). मन्थररक्षणे उपायः (क, ह, त). (10). तथा क्रियतां (अ).

+"इति" इत्यारभ्य "हिरण्य" इत्यारम्भपर्यन्तं "य, ल" पुस्तकयोः, "चित्राङ्गो मृतमिवात्मानं" इत्यारम्भपर्यन्तं च 'ब' पुस्तकेऽन्या रीतिः।

⊕"हिरण्यकश्चित्राङ्ग लघुपतनकावाह" इत्यनन्तरं "चित्राङ्गो मृतमिवात्मानं" इत्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः।

⊢ 'इति' इति 'ल' पुस्तकमात्रपाठः। 'एवं' इति' इत्यनन्तरं "लुब्धको निराशः स्वगृहं" इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

⊳ "तावूचतुः" इत्यारभ्य "हिरण्यक आह—"चित्राङ्गो मृतमिवात्मानं" इत्यारम्भपर्यन्तं 'त' पुस्तके ग्रन्थलोपः।

⊳⊳ "आवां" इत्यारभ्य 'जानाति' इत्यन्तं 'क' 'च' पुस्तकयोरधिकः पाठः। तत्र च "आवां न किञ्चिदपि जानीवः" इति 'च' पुस्तकपाठः 'क' पुस्तके "आवां किञ्चिदपि न जानीव" इति विपरिणतः।

E 'किं' इत्यारभ्य 'इति' इत्यन्तं 'क' 'च' पुस्तकयोर्न दृश्यते ।

F 'इति' इति 'प' पुस्तकमात्रपाठः।

[1]हिरण्यक आह–[2]चित्राङ्गो [3]मृतमिवात्मानं [4]कृत्वा +लुब्धकस्य पन्थानं [आश्रित्य] सरस्तीरे ⊕तिष्ठतु; काकश्च +तस्योपरि चञ्चा [5]लिखन् Fकिमपि नादं करोतु; [6]ततो व्याधो [7]नूनमयं मृगो [8]मृत [9]इति भूमौ धनुर्निधाय Eयावदागच्छति ताव-दहं [10]कच्छपस्य [11]बन्धं [12]छेत्स्यामि; [13]छिन्नबन्धश्च कच्छपो [14]जलाशयं [15]प्रवेक्ष्यति इति। K[16]चित्राङ्गः लघुपतनकावपि तथैव [17]कल्पयतः। एवमनुष्ठिते [18]तथैव सर्वं [19]संवृत्तम्।

---

(1). स आह – (क, त), हिरण्यकः – चित्रा- (ग), हिरण्यक ऊचे– चित्रा- (ज). (2). चित्राङ्गः त्वमस्य व्याधस्यादृश्योऽग्रतो गत्वा उदकसन्नि-विष्टभूप्रदेशे निपत्य मृत- (अ), चित्राङ्गः त्वमस्य व्याधस्याग्रतः नदी-समीपे विप्रकृष्टे भूप्रदेशे निपत्य मृत- (ट), चित्राङ्गदो जलसमीपं गत्वा मृत (ड). (3). मृत इवा- (अ, च, ट, प), मृतरूपमात्मानं दर्शय। लघु-पतनक- (अ), मृतमात्मानं कृत्वा (ट). (4). कृत्वा जलाशयसन्निधौ निपत्य तिष्ठतु (अ), कृत्वा मृगयूथसन्निधौ निपात्य तिष्ठतु (च), कृत्वा निपात्य हृदयसमीपे तिष्ठतु (ट), कृत्वा हृदयसन्निधौ निपात्य तिष्ठतु (त), कृत्वा हृदसमीपे निपात्य तिष्ठतु (प), कृत्वा दर्शय। अयमपि लघुपतनकः त्वदुपरि (ट). (5). विलिखन् (अ), लिखन् इव नादं (च). (6). असावपि व्याधाधमः अवश्यं लोभात् साश्रङ्कोऽयं मृत- (च). (7). नूनं मृगं हतं इति (क), नूनं मया मृगो (ज). (8). हत इति (च), हतमिति (ज). (9). इति तद्ग्रहणार्थं कर्मं भूमौ (अ). (10). कच्छबन्धं छेदयामि। भिन्नबन्धश्च (अ), मन्दरस्य बन्धं (ट), मन्दरस्य बन्धनं छेदयामि अयं छिन्न- (प). (11). बन्धनं छेदयामि। छिन्न- (च), पाशं छेत्स्यामि (त). (12). छेदयिष्ये। छिन्न- (क), छेद-यामि। छिन्न- (ट). (13). छिन्नबन्धस्स जला- (क, च, त), छिन्नबन्ध एव स जला- (ट, प). (14). जलाशयं (प). (15). प्रविश्यादृश्यो भवेत्। चित्राङ्गः (अ). (16). तत्र चित्राङ्गः (क), चित्राङ्गलघुपतनकाभ्यां तथा-कृते (व). (17). कल्पयतः। मन्थरकयः सर्वे मुक्तापदः स्वस्थाः।

एवमनुष्ठिते (क), कल्पयतः। एवमनुष्ठिते (च), अवसर्पतः। एवमनुष्ठिते (ट, त), अवसर्पतः। इत्येवमनुष्ठिते (प). (18). तद्वैव (अ), तथैव संवृत्तम् (च, ट). (19). वृत्तम् (अ, क, त), निवृत्तम् (प).

+ 'लुब्धकस्य पन्थानं' इति 'क' पुस्तकमात्र पाठः।

⊕ 'काकश्च' इत्यनन्तरं 'ततोऽव्याधः' इत्यारम्भपर्यन्तं 'य' पुस्तके अन्या रीतिः।

⊢ तस्योपरि इत्यनन्तरं 'बन्धं छेत्स्यामि' इत्यारम्भपर्यन्तं 'र' पुस्तके अन्या रीतिः।

F 'किमपि' इति 'अ' पुस्तक पाठः।

→ 'भूमौ धनुर्निधाय' इति 'क' पुस्तकमात्र पाठः। एवं 'भूमौ' इत्यनन्तरं 'निरशनः स्वगृहं' इत्यारम्भपर्यन्तं 'य' 'र' पुस्तकयोः अन्या रीतिः।

E 'यावद्वागच्छति' इति 'प' पुस्तके नास्ति।

D 'इति' इति 'च' 'ट' 'त' पुस्तकपाठः।


K 'चित्राङ्ग लघुपतनकावपि' इत्यत्र "अपि" 'क' पुस्तकोद्धृतः पाठः।

L 'तथैव' इत्यत्र 'तथा' इत्यनन्तरं 'ततो लुब्धकः कर्मवशात् निराशः' इत्यारम्भपर्यन्तं 'क' पुस्तकेऽन्या रीतिः।

[1]ततो [2]लुब्धकः [3]स्वकर्मवशात् [4]निरशनो [+]निराशस्सन् [5]स्वगृहं [6]गतः। [7]मन्थरादयश्च [8]सर्वे [9]मुक्तापदः स्वस्थानं गत्वा [10]यथासुखमवस्थिताः।

मैत्री-विवेक-लोकमत्ययुतानां कार्यसाधनक्षमत्वम्

विजातीयास्समेताश्च बुद्धिमन्तस्सुहृत्तमाः।
साधयन्त्याशु कार्याणि काककूर्ममृगाखवः॥८९॥



[11]इति [12]पञ्चतन्त्रसङ्ग्रहे [13]मित्रप्राप्त्यभिधानं [14]द्वितीयं [15]तन्त्रं [16]समाप्तम्

श्रीः

(1). अथ लुब्ध- (अ). (2). लुब्धकं स्व- (अ), लुब्धको निराश- (ज). (3). स्वकर्मवशात् निराश- (अ, क, त). (4). निरशनो निर्मांसश्च स्वगृहं (प). (5). गृहं (च), स्वगृहमेव प्रतिजगाम (ठ), कटकं प्रविष्टः। मन्थ- (अ). (6). आगतः (ट, प), जगाम (ज). (7). मित्रमन्थरादयश्च (अ), मन्थ-रादयस्सर्वे (क, च), मन्थरा- (ट), मन्थरादयस्सर्वे (त, प), (8). सर्वे छित्वा स्वस्थानं (ज). (9). स्वस्थानानि गत्वा (क). (10). यथासुखमुप-स्थिताः। (ज), यथासुखमास्थिताः (ट, त). (11). इति मित्र (अ), समाप्तं चेदं मित्रप्राप्तिर्नाम द्वितीयं (ज), इति तन्त्राख्यायिके मित्रप्राप्तिर्नाम

द्वितीयं (र), इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके (ल). (12). पञ्चतन्त्रे सुहृत्प्राप्तिर्नाम द्वितीयं (क), पञ्चतन्त्रके मित्रसम्प्राप्तिर्नाम द्वितीयं (ल). (13). सुहृल्लाभो नाम द्वितीय- (च, ट, न). (14). द्वितीयतन्त्रं (क, च, न). (15). तन्त्रम्। शुभमस्तु (अ), तन्त्रं इति (ट), तन्त्रम्। यस्यायमाद्यः श्लोकः — असाधना (य). (16). सम्पूर्णम् (व).

+ 'निराशस्सन्' इत्यत्र 'सन्' इति 'च' पुस्तकमात्रपाठः।

→ 'मन्थ' इत्यारभ्य 'विजातीया' इति पदप्रारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः। एवं 'मन्थ' इत्यारभ्य आतन्त्रसमाप्ति 'र' 'ल' पुस्तकयोः अन्या रीतिः।

D 'विजातीया' इतीदं पदं 'अ' पुस्तकमात्रे दृश्यते।

E 'तन्त्रं' इत्यनन्तरं अधःप्रदर्शितो भागः 'य' पुस्तके दृश्यते—
यस्यायमाद्यः श्लोकः —

असाधना वित्तहीना बुद्धिमन्तो बहुश्रुताः।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत्॥

E 'इति' इत्यारभ्य 'समाप्तं' इत्यन्तं 'व' पुस्तके नास्ति।

F 'समाप्तम्' इति 'अ' 'ट' 'य' 'र' पुस्तकेषु न दृश्यते।

[1]तत्र [2]अनेकवायसकुलपरिवृतो मेघवर्णो नाम [3]वायसराजः [4]प्रतिवसति [5]स्म । तस्य [+6]च [7]नातिदूरे [8]उलूकसहस्रपरिवृतः [9]अरिमर्दनो नाम [⊕10]उलूकराज [⊢]आम्रवने तिमिरवनोद्देशे प्रतिवसति स्म ।

---

(1). तत्र च मेघ- (य, ल). (2). अनेकवायसपरिवृतो (क, च, ट, त, प). (3). वायसः प्रति- (च, र), वायसराजः अनेककाकपरिवृतः प्रति (य), वायसराजः अनेककाकपरिवारः प्रति- (ल). (4). प्रतिवसति । तस्य (अ), प्रतिवसति । तत्रातिदूरे (त). (5). स्म काकसहस्रपरिवारः । तस्य (र). (6). च शत्रुः अपमर्दो नाम (र). (7). अनतिदूरे उलूक- (अ). (8). उलूककोटिपरिवृतः पारियात्रसहायो महामर्दो नाम (च). (9). उपमर्दो नाम (क), आमर्दनो नाम (ट, प), आमर्दको नाम (त), तथान्योऽरिमर्दनो नाम (ल). (10). कौशिकराजः (च, प), महानुलूकः (य), उलूकराज उलूकसहस्रपरिवारः (र).

+ 'च' इति 'अ' 'र' पुस्तकयोः पाठः ।

'च' इत्यारभ्य 'अरिमर्दनो' इत्यारम्भपर्यन्तं 'य' 'ल' पुस्तकयोरन्या रीतिः ।

⊕ 'उलूकराजः' इत्यनन्तरं 'प्रतिवसति स्म' इत्यारम्भपर्यन्तं 'य' 'ल' पुस्तकयोः अन्या रीतिः । तथा 'उलूकराजः' इत्यनन्तरं 'सहजवैरानुशयात्' इत्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः ।

⊢ "आम्रवने तिमिरवनोद्देशे" इति 'क' पुस्तकमात्रपाठः ।

+[1] अथैकदा [2]⊕ सहजवैरानुशयात् काकानां [3] निशि दर्शनं नास्तीति मत्वा [4] रात्रौ सकलं [5] काककुलं [6] उलूकैर्व्याकुलीकृतं [7] व्यापादितं च । [8] मेघवर्णस्तु [9]→ कथञ्चित्तरु-कोटरमाश्रित्यात्मानं रक्षितवान् । ⊢[10] अथान्येद्युश्च [11] कथंकथ-मपि जीवितकोटिमुपागतैः [12] मन्त्रिभिः [13]⊳⊳ सह मेघवर्णो-[14] मन्त्रयितुं F[15] उपक्रान्तः ।

---

(1). तथैकदा (क, त), ततैकदा (च, प). (2). सहजवैरानुबद्धेन काकान् निशि (अ), सहजवैरानुबद्धेन काकानां (क), सहजवैरानु-बन्धेन काकानां (च, ट, त), वैरानुबन्धेन काकानां (प), स वैरानुशयात् (ट). (3). निशायां दर्शनं (क), निशादर्शनं (ट). (4). रात्रावागत्य सकलकाक-सकलकाककुलं (अ), रात्रावागत्य सकलं (क, ट, प), रात्रावागत्य सर्वं काक-काककुलं (च, त). (5). तत्काककुलं (क). (6). उलूककुलैः व्याकुलितम् । व्यापाद्य च मेघवर्णः (प). (7). व्यापाद्यास्वादितं च । मेघ-(अ). (8). मेघवर्णश्च कथ- (अ, त, प), मेघवर्णः कथं- (च). (9). कथञ्चिदपि तद्विवरमाश्रित्यात्मानं (च), कथञ्चित्तरुविवरमाश्रित्यात्मानं (ट, त), कथं कथञ्चित् गत्वा कुत्रचित्तरुविवरमाश्रित्यात्मानं (प). (10). अन्येद्युश्च कथं- (अ, त), अन्येद्युर्मेघवर्णो मन्त्रिभिः (क), अन्येद्युः कथं- (च, ट, प). (11). कथञ्चित् जीवित- (ट). (12). मन्त्रिभिरार्तैस्सह (क, ब), मन्त्रिभिस्साद्धं मेघ-वर्णः (ट). (13). सह मन्त्र- (प). (14). मन्त्रयितुं च उप- (प). (15). आरब्धः (ट).

+ 'अथ' इत्यनन्तरं ~~'तच्छ्रुत्वा सन्दीपिनमाह'~~ 'स च तावज्जाड्य नोवाच' इत्यारम्भपर्यन्तं 'प' पुस्तकेऽन्या रीतिः। 'अथ' इत्यारभ्य 'अथान्येद्युः' इत्यारम्भपर्यन्तं 'ल' पुस्तकेऽन्या रीतिः।

⊕ 'सहजवैरानुशयात्' इत्यनन्तरं अथान्येद्युः इत्यारम्भपर्यन्तं 'र' पुस्तके अन्या रीतिः।

→ "कथञ्चि" इत्यनन्तरं 'त्यात्मानं' इत्यारम्भपर्यन्तं 'क' पुस्तके ग्रन्थलोपः।

⊢ 'अथान्येद्युः' इत्यनन्तरं 'मन्त्रिभिस्सह' इत्यारम्भपर्यन्तं 'र' पुस्तके 'तच्छ्रुत्वा सन्दीपिनमाह' इत्यारम्भपर्यन्तं 'ल' पुस्तके चान्या रीतिः।

⊳⊳ 'सह' इत्यनन्तरं "उपक्रान्तः" इत्यारम्भपर्यन्तं 'क' पुस्तके ग्रन्थलोपः।

F 'उपक्रान्तः' इत्यनन्तरं 'तस्यान्वय-' इत्यस्मात् प्राक् 'ब' पुस्तकेऽन्या रीतिः।

[1]तस्यान्वयक्रमागताः पञ्च [2]मन्त्रिणः—[3]उद्दीपि-सन्दीपि-प्रोद्दीपि-आदीपि-चिरजीवि-नामानः। +स च [4]तानाहूयाब्रवीत्— हे! ⊕महानुभावाः! [5]युष्मन्मन्त्ररक्षितमिदं मे राज्यम्। इदानीं [6]अत्याहितमापतितं वर्तते। [7]तदत्र [8]किमुचितमित्युच्यतां इति। ~~[illegible]~~ तत्र [9]उद्दीपी आह— इदृशेन बलवता [10]अभियुक्तस्य ~~[illegible]~~-

(1). तस्यान्वयपरम्परागताः (क, च, ट), तस्यान्वयं परम्परागताः (त), तस्य परं परम्परागताः (प), तस्य चान्वयागताः (ह). (2). मन्त्रिणस्सन्ति। उद्दीपि- (अ, ट), मन्त्रिणस्तिष्ठन्ति (क, च), मन्त्रिणस्तिष्ठन्ति। तत्र च उद्दीपि-(त, प), सचिवाः। तद्यथा— उद्दी- (ह). (3). उद्दीपि सन्दीपि प्रोद्दीपि आदीपि सजीवीति। स च (अ), उज्जीवितः सञ्जीवितः, प्रोज्जीवितः, आजीवितः, चिरजीवितश्चेति नामानः। स च (क), उद्दीपि सन्दीपि प्रोद्दीपि आदीपितः चिरजीवी इति। स च (च, ट), उद्दीपितः, सन्दीपितः, प्रोद्दीपित, आजीवितः चिरञ्जीवी इति स च (त), उद्दीपितः सन्दीपितः, प्रोद्दीपितः, आदीपितः, चिरञ्जीवी। स च (प), उद्दीपी, सन्दीपी, आदीपी, प्रदीपी, चिरजीवी चेति। (ह). (4). सचिवानाहूय प्रोवाच— (अ). (5). युष्मत्परिरक्षितं ममेदं राज्यम् (क), युष्मन्मन्त्रपरिरक्षितं मे (च, ट), युष्मन्मन्त्रपरिरक्षितमिदं मे (त), युष्मन्मन्त्ररक्षितं मे (प). (6). आत्यन्तिकापत् वर्तते (अ), अत्याहितमापादितं वर्तते (क, च, ट, प). (7). तत्र (अ), अत्र (च, ट, त, प). (8). किमुचितमुच्यताम्। उद्दीपी (अ), किमुचितमिति। तत्र (क, च, ट, त, प); (9). उज्जीवित आह (क), उद्दीपित आह (च, ट, प), प्रथममुद्दीपित आह (त). (10). अभियुक्तो रिपुः देशान्तरगमनं ××× व इति नीति (क).

+ 'स च' इत्यारभ्य 'बलवदाश्रयो विदेशगमनं वा' ~~[illegible]~~ इत्यारभ्यपर्यन्तं 'र' पुस्तके अन्या रीतिः। एवं 'स च तानाहूयाब्रवीत्' इत्यनन्तरं 'तच्छ्रुत्वा सन्दीपितमाह' इत्यारभ्यपर्यन्तं 'थ' पुस्तकेऽन्या रीतिः।

⊕ 'हे महानुभावाः' इति 'च' पुस्तकमात्रपाठः।

[1]बलवदाश्रयो [2]विदेशगमनं [3]अनुप्रवेशो वान्यन्नास्तीति [4]नीतिशास्त्रकारैः उक्तं+ इति । [5]तच्छ्रुत्वा [6]सन्दीविन-माह— ⊕[7]किं भवान् अनुमन्यते इति । [8]स एवमाह— →[9]यदनेनोक्तं तत्र [10]पक्षत्रयेऽपि [11]स्थानत्यागस्तावत् [12]सहसा न युक्तः । ⊢यतः—

(1). बलवदाश्रयो वा विदेश- (अ), किन्तु बलवता विगृहीतस्य तदनुप्रवेशो विदेश- (ट). (2). विदेशगमनं प्रवेशो वास्त्विति (अ), विदेशगमनं वा तदनुप्रवेशो वान्य- (च,त), विदेशगमनं वा तदनु-प्रवेशो वेति (ट), विदेशगमनं वा । तच्छ्रुत्वा (ट). (3). अनुप्रवेशो वेति (प). (4). शास्त्रकारैरुक्तम् (ज), नीतिशास्त्रसारैरुक्तम् (ढ), नीतिशास्त्रैरुक्तम् (ण). (5). एतच्छ्रुत्वा (क), तच्छ्रुत्वा तदनन्तरं सन्दी- (त), अथ तच्छ्रुत्वा (ब,ल). (6). सन्दीपित आह- (अ,त), स××विनमाह- (क), सन्दीपितमाह- (च,ट,प), सन्दीविनमाह (ब,ल). (7). किं त्वमनु-मन्यसि । स एव (अ), भवतः किमनुमतमिति (क), भवान् किं मन्यते । स (च), किं भवान् मन्यते भवान् इति । स (ट), किं भवान् मन्यते । स (त,प), भवान् किं मन्यत इति (ट). (8). स चाब्रवीत्- देव ! यद- (ढ), स चाह- यद- (त), स चाह- देव ! यद (ण), स चाब्रवीत्- देव ! (थ), सोऽब्रवीत्- देव ! यद- (ट). (9). यद्देवाभिहितं (ट). (10). पक्षद्वये स्थान- (अ). (11). स्थानत्यागोऽस्तु स च सहसा (अ), स्थानत्यागोऽस्ति । स च सहसा (ज), स्थानत्यागोऽस्ति सहसा (त), स्थानत्यागो हि । स च सहसा (ज). (12). सहसा युक्तः (अ), सहसा नय एव युक्तः (त).

+ 'इति' इति 'अ' 'ट' पुस्तकयोः पाठः ।

⊕ 'किं भवान्' इत्यारभ्य 'स एवमाह' इत्यारभ्यपर्यन्तं 'ट' पुस्तके, 'प्रोद्दीपिनं पृष्टवान्' इत्यारभ्यपर्यन्तं 'ल' पुस्तके चान्या रीतिः ।

→ 'यदनेन' इत्यारभ्य प्रोद्दीपिनं पृष्टवान् इत्यारभ्यपर्यन्तं 'य' पुस्तके, तथा 'यदनेन' इत्यनन्तरं प्रोद्दीपिनं पृष्टवान् इत्यारभ्यपर्यन्तं च 'ट' पुस्तकेऽन्या रीतिः ।

⊢ 'यतः' इति 'च' पुस्तकमात्रपाठः ।

स्थानस्य महिमा

+स्थान एव [1]स्थितस्सर्वः करोति स्वोचितां क्रियाम् ।
[2]नं जातु क्षरति क्षीरं [3]अजायास्तु [4]गलस्तनः ॥

स्थानबलस्यैव कार्यसाधकता

[5]स्थानस्थस्याप्रमत्तस्य राज्ञो न स्यात्कथं जयः ।
इवापि स्थानबलादेव [6]जयत्यागन्तुकान् बहून् ॥

तस्मात् [7]गतागतादिना कालो [8]याप्यताम् । ततो जातबलास्सन्तः [9]उपायमेकमवगम्य [10]अनुष्ठास्यामः । [11]एतत् श्रुत्वा [12]प्रोद्दीपिनं पृष्टवान् — ~~[struck out]~~

---

(1). गतस्सर्वः (प). (2). तथा हि रक्षति क्षीरं (प). (3). अजादेहे गल- (अ), अजादेनोः गळ- (त), अजङ्गेव गोस्तनः (प). (4). गलस्तनम् (त). (5). स्थान × × × स्याप्र- (क). (6). जयत्या × × × न्तुकान् (क). (7). गतागतादिकालं यापयन्तश्शनैश्शनैर्जातबला- (क), दूतगतागतादिना (ट, त), गतागतादिना स्थानमवलम्ब्यैव कालः (प). (8). यास्यताम् (अ), याच्यताम् (त). (9). उपायमिममव- गम्य (अ), उपायमिम × × × मुपगम्य (क), उपायमेकमागत्य अनु- (च), उपायमेकमनुगम्य (ट), उपायमेकं लब्ध्वा अनु- (त), उपाय- मेकं अनु- (प). (10). अनुष्ठास्यामः (अ). (11). तच्छ्रुत्वा (क, च, य). (12). प्रोद्दीपितमुक्तवान् (अ), प्रोद्दीपितं पृष्ट- (क, च, ट, त, प), अनुजीविन- मपृच्छत् (य), प्रदीपिनं पृष्ट- (ट), प्रजीविनं आह (ल).

+ 'स्थान एव' इतीदं पदं 'क' पुस्तके न दृश्यते ।

+[1] किं [2] भवान् मन्यते इति । ⊕[3] स आह — [4] बालवृद्ध-स्त्रीभिः [5] स्थानं विसृज्य गन्तुमशक्यत्वात् [6] सन्धानमेवार्हति [7] भवान् । तदत्र [8] बलवता सह [9] सन्धिः [10] कर्तव्या [11] सर्वश्रेयसे । तस्मात् सन्धिं [12] कृत्वा [13] इहैव [14] स्थास्याम इति । [15] तच्छ्रुत्वा [16] आदीपिनं आह — [17] भवतः किमनुमतं इति । [18] स आह —

---

(1). किं त्वं मन्यसे ? स (अ). (2). भवान् किं मन्यते ? स (ज), भवान् किं मन्यते ? (त). (3). सोऽब्रवीत् — बाल- (क, ट, च), सोऽप्यब्रवीत् — बाल- (त), सोऽब्रवीत् — (द, ल). (4). बालवृद्धप्राणां अस्माकं सन्धिः (अ), बालवृद्ध-स्त्रीभिः अस्माकं गतागतादिना वशगो तदत्र (क), बालवृद्धस्त्रीभरणात् सन्धानमर्हति (ज), बालवृद्धस्त्रीभारसन्धानं अर्हति (त). (5). भूभारं विसृज्य गन्तुमशक्यत्वात् सन्धान- (ट). (6). सन्धानमर्हति भवान् बलवता (ज), सन्धानमेवार्हति भवान् बलवता (च), सन्धानमेवार्हति कर्तव्या (ट). (7). भवान् बलवता (त, च). (8). बलवता सन्धिः (क). (9). सन्धिर्बलवता श्रेयान् । सम्यक् सन्धिं (अ), सन्धिरेव कर्तव्या (ज). (10). कर्तव्या श्रेयान् । तस्मात् (क), कर्तव्यः श्रेयान् सम्यक् सन्धिं (च, त), कर्तव्या भवता सर्व-

+[1] किं [2] भवान् मन्यते इति । ⊕[3] स आह — [4] बालवृद्ध-स्त्रीभिः [5] स्थानं विसृज्य गन्तुमशक्यत्वात् [6] सन्धानमेवार्हति [7] भवान् । तदत्र [8] बलवता सह [9] सन्धिः [10] कर्तव्या [11] सर्वश्रेयसे । तस्मात् सन्धिं [12] कृत्वा [13] इहैव [14] स्थास्याम इति । [15] तच्छ्रुत्वा [16] आदीपिनं आह — [17]▷ भवतः किमनुमतं ▷▷ इति । [18] स आह —

---

(1). किं त्वं मन्यसे ? स (अ). (2). भवान् किं मन्यते ? स (ज), भवान् किं मन्यते ? (त). (3). सोऽब्रवीत् — बाल- (क, ट, प), सोऽप्यब्रवीत् — बाल- (त), सोऽब्रवीत् — (र, ल). (4). बालवृद्धप्राणां अस्माकं सन्धिः (अ), बालवृद्ध-स्त्रीभरा अस्माकं गतागतादिना वशगो तदत्र (क), बालवृद्धस्त्रीभरणात् सन्धानमर्हति (च), बालवृद्धस्त्रीभारसन्धानं अर्हति (त). (5). भूभारं विसृज्य गन्तुमशक्यत्वात् सन्धान- (ट). (6). सन्धानमर्हति भवान् बलवता (ज), सन्धानमेवार्हति भवान् बलवता (च), सन्धानमेवार्हति कर्तव्या (ट). (7). भवान् बलवता (त, प). (8). बलवता सन्धिः (क). (9). सन्धिर्बलवता श्रेयान् । सम्यक् सन्धिं (अ), सन्धिरेव कर्तव्या (प). (10). कर्तव्या श्रेयान् । तस्मात् (क), कर्तव्यः श्रेयान् सम्यक् सन्धिं (च, त), कर्तव्या भवता सर्व- (ट). (11). सर्वश्रेयसे । सम्यक् सन्धिं (ट, प). (12). कृत्वा ××× स्थितं (क). (13) इहैव तच्छ्रुत्वा (ज). (14). स्थीयतामिति (ट, त, प). (15). तच्चावधार्य आ- (ह), तच्चावधार्य उद्दीपित माह (प), तस्यापि वचनमवधार्य (र), राजा तत्समाकर्ण्य चिरजीविनं प्राह (ल). (16). आजीविनं आह — (क), आदीपितं आह — (ज, ट, त), चिरजीविनं आह — (य), आदीपिनं पृष्टवान् (र). (17). भवान् किं मन्यते स (त), भवता किमनु- (ज). (18). स चाह — (ज), सोऽब्रवीत् — (य).

+ 'किं' इति 'अ' 'क' पुस्तकयोः पाठः । 'किं' इत्यारभ्य 'स' इत्यारम्भपर्यन्तं 'प' पुस्तके न दृश्यते । एवं 'किं' इत्यारभ्य 'स' इत्यारम्भपर्यन्तं 'य' 'र' (ल) पुस्तके अन्या रीतिः ।

⊕ 'स आह' इत्यनन्तरं 'तच्छ्रुत्वा आजीविनं आह' इत्या-रम्भपर्यन्तं 'य' 'र' 'ल' पुस्तकेषु अन्या रीतिः ।

▷ 'भवत' इत्यारभ्य 'सः' इत्यारम्भपर्यन्तं 'य' 'र' पुस्तकयोः, "चिरजीविनं आह" इत्यारम्भपर्यन्तं च — 'ल' पुस्तकेऽन्या रीतिः ।

▷▷ 'इति' इति 'प' [illegible]

+ ते दिवान्धाः; ⊕ वयमपि रात्र्यन्धाः; [1] तत्कथं दूतसन्दर्शनम्? [2] कथं वा सन्धिः? [3] यतस्तैः [4] रात्रावागत्याधः [5] पातनं कृतमतो वयमपि [6] दिवा गत्वा दिवान्धान् → [7] व्यापादयाम [8] इति ।

---

(1). तत्कथं च सन्धिः (अ), कथं दूरदर्शनम् (प). (2). कथं च सन्धिः (च, ट), कथं सन्धिः (प). (3). अथ तैः (अ), अतस्तैः (क, च, ट, त), यतस्ते रात्रा- (प). (4). रात्रावागत्य व्यापादितं वयमपि (अ), रात्रावागत्य व्यापादिताः वयमपि (प). (5). पतनं दत्तं वयमपि (क, च), पतनं कृतं वयमपि (ट), पातनं कृतं वयमपि (त). (6). दिवा गत्वा निशि तान् व्या- (प). (7). व्यापादयामः । एवं चतुर्णां (क), पातयाम इति (ट), व्यापादयामः । एवं चतुर्णां (त). (8). इति चेत् चतुर्णां (च), इति चतुर्णां (ट), इति वांच चतुर्णां (प).

+ 'ते दिवान्धाः' इत्यारभ्य 'बहुवृत्तान्तदर्शिनं चिरजीविनमाह' इत्यारम्भपर्यन्तं 'य' पुस्तके, 'चतुर्णां मन्त्रिणां' इत्यारम्भपर्यन्तं 'र' पुस्तके चान्या रीतिः ।

⊕ 'वयमपि' इत्यत्र 'अपि' इति 'च' पुस्तकपाठः । एवं 'वयं' इत्यारभ्य 'यतस्तैः' इत्यारम्भपर्यन्तं 'त' पुस्तके ग्रन्थलोपः ।

→ 'व्यापादयामः इति' इत्यनयोः पदयोर्मध्ये 'च' पुस्तके अधः प्रदर्शितो अधिकः पाठो दृश्यते—

तच्छ्रुत्वा प्राक्कीर्तितमाह— भवतः किमनुमतम्? स आह— देशान्तरं गमिष्यामः । तैर्योद्धुमसमर्था वयं [illegible] ।

[1] एवं [+2] चतुर्णां [3] मन्त्रिणां मन्त्रमवधार्य स राजा [4] बहुवृत्तान्तदर्शिनं [5] चिरजीविनमाह — तात! [6] त्वद्बुद्धिविभवार्जितं राज्यमिदं [7] अस्मत्कुलोपभोग्यं अस्माकं गतम्। [8] सम्प्रति प्राप्तकालमुपदिश्यताम्। [9] चिरजीवी आह — [10] देव! [11] किमेभिः [12] नोक्तमस्ति तथापि [13] किञ्चिदुच्यते — [14] यद्यप्यमी परं [15] विश्वासभूताः तथापि [16] मन्त्रमतीव निभृतमुच्यते —

---

(1). ततो मेघवर्णस्तेषां चतुर्णामपि (द). (2). चतुर्णां मन्त्र- (अ), चतुर्णां मतिमवधार्य (च), चतुर्णामवधार्य (त), चतुर्णामवधार्य बहु- (ब). (3). मन्त्रिणां मतिमवधार्य (क, ट). (4). बहु ... दर्शिनं (क), (5). चिरञ्जीविनं (ट), चिरजीव्यभिधानं प्रणम्योवाच — तात! (थ), स्थिरजीविनामानं प्रणम्योवाच — तात! (ल). (6). त्वद्बुद्धिविभवार्जितं राज्यं (अ), त्वद्बुद्धिविभवात् जीवितं राज्यं अस्मत्- (क), त्वद्बुद्धिविभवादेवेदं राज्यं (ह), त्वद्बुद्धिरेव श्लाघ्या। स आह — यद्यप्यमी (प). (7). अस्मत्कुलोपभोगं (क), अस्मत्कुलोपभोग्यं (ट, न). (8). सम्प्रति च प्राप्त- (ह). (9). स आह — (प, ल), सोऽब्रवीत् — वत्स! (थ), एवमुक्ते चिरजीव्याह — (द). (10). वत्स! (य, ल). (11). किन्नामीभिः (अ). (12). नोक्तं (र). (13). किञ्चिदुच्यते — देव! सर्वेऽप्यमी परमाप्ताः तथापि (अ), किञ्चिदुच्यते — देव। यद्य- (क, ट), किञ्चिदुच्यताम् — देव! यद्य- (त). (14). यद्यपि परं (क, त), यद्यमी (ट). (15). अविश्वास- (न, प). (16). मन्त्रवति निभृत- (अ), मन्त्रभूतमुच्यते — (क), मन्त्रमतिनिभृतमुच्यताम्। (च), मन्त्रनिभृतमुच्यते (व).

+ 'चतुर्णां' इत्यनन्तरं 'चिरजीविनमाह' इत्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

⊕ 'तात' इति 'ट' पुस्तके न दृश्यते।

⊢ 'राज्यमिदं' इत्यत्र 'इदं' इति 'क' पुस्तकमात्रे दृश्यते। तथा राज्यमिदमित्यत्र 'राज्यं' इत्यनन्तरं 'अस्मत्' इत्यस्मात् प्राक् 'च' पुस्तके अधः प्रदर्शितोऽधिकः पाठः परिदृश्यते—

"अस्माभिश्चिरकालमधिष्ठितमेतावत्पर्यन्त-मरातिरहितं"

→ "अस्तङ्गतं" इति 'अ' 'क' पुस्तकयोरेव दृश्यते।

F 'देव' इति 'क' 'च' 'त' पुस्तकेषु न दृश्यते।

E 'किमेभिः' इत्यारभ्य 'यद्यप्यमी' इत्यारम्भपर्यन्तं 'च' पुस्तके नास्ति। तंव 'किमेभिः' इत्यारभ्य सुचिरं हि इति पद्यारम्भपर्यन्तं 'य' 'ल' पुस्तकयोरन्या रीतिः।

⊳ 'नोत्तमस्ति' इत्यत्र 'नोत्तं' इत्यनन्तरं 'आयव्ययौ' इति पद्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

C 'तथापि' इति 'क' 'ट' 'त' पुस्तकेषु नास्ति।

D 'मन्त्रमतीव' इति 'ट' पुस्तके नास्ति।

S- 'निभृतमुच्यते' इत्यनन्तरं 'मन्त्रबीज' इति पद्यात् प्राक् अयमधः प्रदर्शितो भागः 'अ' पुस्तके दृश्यते—

"तेन चैदाप्तपरम्परा चाभिहिते"।

मन्त्रस्य अवश्यरक्षणीयता

+मन्त्रबीजमिदं [1]गुप्तं रक्षणीयं प्रयत्नतः।
मनागपि न भिद्येत [2]तद्भिन्नं न प्ररोहति॥

⊕[3]आप्तपरम्परया हि मन्त्रो भिद्यते—

आप्तपरम्परया मन्त्रोच्छेदः

[4]आप्तस्य [5]चाप्तस्तस्याप्तः [6]तस्याप्याप्तोऽस्ति [7]कश्चन।
सुगुप्तमपि मन्त्रं हि [8]भिनत्त्याप्तपरम्पराः॥

---

(1). पक्वं रक्ष- (अ, क, च, ट, त), रक्ष्यं रक्ष- (प). (2). भिन्नमेतन्न (अ), भिन्नं ह्येतन्न (क, च, ट, त, प). (3). आप्तपरम्पराप्राप्तो मन्त्रो (ट), आप्तपरम्परया मन्त्रो (प). (4). आस्ति चाप्तस्य (क), आप्तस्य ××× चाप्तोऽस्ति तस्या- (च), अस्त्याप्तस्यापि चाप्तो- (त), आप्तस्याप्तः ×××× स्याप्तस्तस्याप्याप्तोऽस्ति (प). (5). चाप्तोऽन्यः तस्या- (क, त). (6). तस्य चास्ति (अ, ट). (7). परम्। सु- (अ), अतःपरम्। सु- (च), ततःपरम्। सु- (ट), हि कश्चन (त). (8). भिनत्त्याप्तपरम्पराम्॥ तथा- (अ, क, च, त), भिनत्त्याप्तपरम्परा॥ तथा- (ट).

+ ~~××××~~ अयं च 'मन्त्रबीज' इति श्लोकः 'व' पुस्तके १३२ तमसङ्ख्याकः मित्रभेदे दृश्यते।

⊕ 'आप्त' इति आरभ्य 'आप्तस्य' इति पद्यारम्भपर्यन्तं 'अ' पुस्तके न दृश्यते।

[1] तथा [2] चानुष्ठिते राजनि [3] चिरजीवी [4] परावरज्ञो +[5] राज्ञे विज्ञापयामास — ⊕ देव! [6] सन्धिविग्रहयानासन-द्वैधीभावसमाश्रया ⊢ हि ते षड्गुणाः कर्मणां [7] प्रारम्भोपायाः। हि तैस्सह [8] पुरुषद्रव्यसम्पत्, [9] देशकालविभागः, [10] विनिपातः, प्रतीकारः, [11] कार्यसिद्धिः इति पञ्चाङ्गो मन्त्रः।

---

(1). तथा कृते चिर- (अ), तथानुष्ठिते (च), तथा विवित्ते चिर- (ट), तथानुष्ठीयते चिर- (त), तथापि विवित्ते चिर- (प). (2). चानुष्ठिते चिर- (क). (3). चिरञ्जीवी (अ, क, च, ट, प). (4). परबलज्ञो (अ), परापरबहुज्ञो (त). (5). राज्ञो वि- (क, च). (6). सन्धिविग्रहयानासन-संश्रयद्वैधीभावाष्षड्गुणाः (अ). (7). प्रारम्भोपायाः। आयो ये ते द्वन्द्व-जालान्युपायास्तिस्रः। हि तैस्सह पुरुष- (अ), आरम्भोपायाः पुरुष- (क, च, त), आरम्भोपायः। पुरुष- (ट, प). (8). पुरुषद्रव्यसम्पत्तिः देश- (च, ट, प). (9). देशकालविभागोऽपि विनि- (त). (10). विनिपात-प्रतीकारः (च, ट, त), विनिपातप्रतीकालः कार्य- (प). (11). कार्यसिद्धिश्चेति (त), पञ्चाङ्गानि। साम- (प).

\+ 'राज्ञे' इति 'ट' 'त' 'प' पुस्तकेषु न दृश्यते।

⊕ 'देव' इति 'च' पुस्तके न दृश्यते

⊢ 'हि ते' इति 'च' पुस्तकमात्रपाठः।

[1]सामदानभेददण्डाश्चत्वार उपायाः। [2]उत्साहशक्तिः, प्रभुशक्तिः, मन्त्रशक्तिः इति शक्तित्रयम्।
[+]आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति राज्ञां विद्याश्चतस्रः

नृणां षड्-व्यसनानि

[⊕]स्त्रियोऽक्षाः मृगया पानं वाक्पारुष्यं च पञ्चमम्।
महच्च दण्डपारुष्यं व्यसनानि नृणां हि षट्॥

---

(1). सामाद्युपायाः सप्त। उत्साह-(अ), सामभेद-दान दण्डाः (क, त, प). (2). उत्साहशक्तिः, मन्त्र-शक्तिः, प्रभुशक्तिः इति (अ, प).

+ 'आन्वीक्षिकी' इत्यारभ्य विद्याश्चतस्रः इत्यन्तं 'अ' पुस्तकमात्रपाठः।
⊕ 'स्त्रियोऽक्षा' इतीदं पद्यं 'त' पुस्तकमात्रे दृश्यते।

सर्वमिदमालोच्य [1]यदुचितं [2]तदनुष्ठीयताम्। इदानीं [3]तावदस्माकं [4]युद्धसामर्थ्यं नास्ति। [5]न च युद्ध-कालोऽयम्—

युद्धकालनिर्णयः

⊕ [6]यत्रायुद्धे ध्रुवो मृत्युः युद्धे जीवितसंशयः।
तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः॥

ᅡ इत्युक्तत्वात्। [7]सर्वथा ते बलवन्तः। + न [8]तैस्सह [9]युद्धमस्माकमुचितम्। तथा च—

---

(1). यथोचितमनुष्ठीयताम्। (अ). (2). तदनुष्ठीयताम्। तत्रास्माकं (क, त), तदनुष्ठीयताम्। योद्धुमस्माकं सामर्थ्यमस्ति। (च), तदनुष्ठीयताम्। अस्माकं (ट, प). (3). तावदस्माकं युद्धसामर्थ्यं (अ), (4). युद्धसामग्री नास्ति (क)। (च), बुद्धिसामर्थ्यं (प). (5). न युद्धकालोऽयम्। (च). (6). यत्र युद्धे (ख). (7). सर्वे ते (क). (8). तैस्सह × × × × × अस्ति। तथा च (क). (9). युद्धमद्यास्ते। तथा च (च), योद्धुं बलमस्माकमस्ति। तथा च (क)(ट), युद्धसामर्थ्यं नास्ति। तथा च (त), युद्धमस्माकमस्ति। तथा च (प).

⊕ 'यत्रायुद्धे' इतीदं पदं 'अ' पुस्तके नास्ति; 'क' पुस्तके तु तालस्य त्रुटितत्वात् ग्रन्थलोपः।

ᅡ 'इत्युक्तत्वात्' इति 'क' पुस्तकमात्रपाठः।

\+ 'न [8]तैस्सह' इत्यत्र 'न' इति 'त' पुस्तके नास्ति।

देशकालादिज्ञस्यैव युद्धादिषु प्रवर्तनौचित्यम्

ज्ञात्वा स्वपरशक्तिं च [1]देशकालौ विचार्य च ।
[2]बकवद्वा [3]वसेत्तूष्णीं [4]सिंहवद्वा समुत्पतेत् ॥

परेषामात्मनश्चैव योऽविचार्य बलाबलम् ।
[5]कार्यायोत्तिष्ठते मोहात् आपदस्तमुपासते ॥

तेजस्विनः शत्रुनिग्रहसामर्थ्यम्

[6]शातयत्येव [7]तेजस्वी [8]दूरस्थोऽप्युन्नतं रिपुम् ।
सायुधोऽपि निकृष्टात्मा [9]किमापन्नः करिष्यति ॥

---

(1). देशकालौ विपर्ययम् । बक- (अ), देशकालविपर्ययम् । बक- (क). (2). बकवच्च वसे- (ट, त). (3). सद्वेत्तूष्णीं (अ). (4). हंसवद्वा (अ). (5). कार्या . . . . मोहात् (क). (6). शान्तयत्येव (क), मथयत्येव (त). (7). तेजांसि दूर- (अ, क, ट, त, प), (8). दूरस्थोऽभ्युन्नतो रिपुः । सायुधोऽपि (अ, ट, त), दूरस्थोऽप्युन्नतो रिपुः । ××× युधोऽपि (क), दूरस्थोऽभ्युन्नतं रिपुम् । (प), दूरस्थोऽभ्युन्नतो रिपुः । सायुधोऽपि (प). (9). किमासन्नः (क, च, ट, त, प).

रिपौ जागरूकताया आवश्यकता

[1]क्षमावन्तं रिपुं [2]प्राज्ञं काले [3]विक्रमकारिणम् ।
परात्मगुणदोषज्ञं [4]अविस्मृत्य वसेद्रिपुम् ॥

लक्ष्मी सुस्थितिस्थानम्

+[5]यमेवाश्रयते लक्ष्मीः [6]उपायपरितोषिता ।
[7]निरुद्विग्ना हि [8]तत्रास्ते न [9]कदाचन दूषिता ॥

[10]मन्त्रप्रभावान्निहिता नरेन्द्रैः [11]श्रीर्भुजङ्गमी ।
मन्त्रशक्त्यैव [12]बद्धा सा भोगं [13]बध्नाति केवलम् ॥

---

(1). अविज्ञातमरिं प्राज्ञं (अ), क्षमावन्तमरिं प्राज्ञं (ट). (2). प्राज्ञं कालविक्रमसेवितम् । परात्म- (व). (3). विक्रमसेवितम् । परात्म- (अ, च, ट, त). (4). अनुस्मृत्य न विश्वसेत् (अ), अनुस्मृत्य न विस्मरेत् (क, च, ट, त). (5). यमेवाश्रयते सा श्रीः उपाय- (अ), तमेवाश्रयते सा श्रीः उपाय (क), तमेवाश्रयते च श्रीः उपाय- (ज), तमेव श्रयते च श्रीः उपाय- (त), तमेवाश्रयते श्रीश्च उपाय- (प). (6). उपायविधितोषिता (क, ट), उपायगुणतोषिता (ज), उपाय- परितोषिणी । निरु- (व). (7). निरुद्विग्नापि तत्रास्ते (क). (8). यत्रास्ते (च). (9). कचगत्ददूषिता (क, च, ट, प), क्वचिद्गद्दूषिता (त). (10). मन्त्रप्रभाव- नीता हि नरेन्द्रैः (क, च, त), मन्त्रप्रभावनीतो हि नरेन्द्र श्री- (ट), मन्त्र- प्रभावनीतानि नरेन्द्र श्री (प). (11). श्रीर्भुजङ्गमा । मन्त्र- (अ), श्रीर्भुजा- गमी (क), श्रीर्भुजङ्गिनी । मन्त्र- (व). (12). बद्धास्ते भोगं (अ), बध्नाति भोगं (प), ~~...~~ बद्धा चेत् भोगं (ट), बध्वा च भोगं (व). (13). बध्नाम्ति केवलम् (अ).

+'यमेवाश्रयते' इति पद्यस्य पूर्वोत्तरार्धयोर्मध्ये अयमधस्तनः श्लोकार्धो दृश्यते—
"सा श्रीर्नीतिमतां वेश्मन्यनाहूताभिधावति ॥"

भूमिपालानां नावमन्तव्यता

न [1]भीरुर्नापरामृष्टो [2]नापयातो न [3]निर्जितः।
[4]नाशक्तो [5]नावमन्तव्यो [6]नीतिविद्भिर्नराधिपः॥

पैशुन्यादियुतानां दण्डनीतेः सुदुर्वहत्वम्

मदावलिप्तैः पिशुनैः [7]लुब्धैः [8]कामात्मभिश्शठैः।
[9]दर्पोद्धतैः [10]क्रोधपरैः दण्डनीतिस्सुदुर्वहा [11]॥

उत्सेकादिरहितानामेव दण्डनीतिधारणयोग्यता

[12]इयं त्वभिन्नमर्यादैः [13]अनुत्सेकैः [14]कृतात्मभिः।
[15]सर्वैस्सहैरुपायज्ञैः [16]अक्षुद्रैरेव धार्यते॥

तत्सर्वथा युक्तमतिनिविद्धम्। तथाचोक्तम्—

---

(1). भीरुर्न परामृष्टो ना- (अ), भीरुर्न परामृष्टो (क, च, ट, प). (2). नापराधो न (ञ). (3). निर्जनः। (ञ). (4). न शक्तो नाव- (अ), नाशक्तो नाव- (क), शक्तस्तु नाव (ट), नाशक्तः नाव- (त), नतस्थो नाव- (प). (5). नचाव-मन्तव्यो (अ). (6). नैको वेत्ति नयाधिकम्॥ मदा- (क, च, त), नैको वेत्ति नयाधिकः॥ मदा- (ट, प). (7). लुब्धैः (क). (8). कामार्थिभिः शठैः। दर्पो- (क). (9). गर्वोद्धतैः (प). (10). क्रोध-परैः (प). (11). सुदुर्लभा। इयं (क, त, च), तु दुर्लभा (च). (12). इयं चाभिन्न- (त), ये त्वभिन्न- (प). (13). नानुत्सेकः क्रियात्मभिः। (क). (14). क्रियात्मभिः (अ, च), शठात्मभिः (त) (15). सर्वोत्साहैरुपा- (क), कर्मोत्साहैरुपा- (च). (16). अक्षुद्रैरेव-धार्यते (च, त), अदूरैरेवावधार्यते (ट), अक्षुद्रैरुपधार्यते (प).

मन्त्रस्यैव जगद्विजयहेतुता

चतुरङ्गबलं हित्वा [1]कोशो [2]मन्त्रश्च युज्यते।
+ कोशात् [3]शत्रुर्भवेत् भृत्यो [4]जगन्मन्त्रेण [5]जीयते॥

लक्ष्म्या नीतिज्ञैकप्राप्यता

[6]या हि प्राणपरित्यागमूल्येनापि न लभ्यते।
सा [7]श्रीर्नीतिविदां [8]वैरमन्यनाहूताभिधावति॥

विजयमूलमन्त्रप्रयोगे बुद्धेः प्राशस्त्यम्

मन्त्रमूलं हि विजयं [⊕]प्रवदन्ति मनीषिणः।
[9]मन्त्रस्य पुनरात्मा च बुद्धिरायतनं [10]परम्॥

---

(1). कोसौ मन्त्री तु युध्यते (क). (2). मन्त्रं च जायते। कोशात् (अ), मन्त्राच्च जीयते। कोशात् (प). (3). भृत्यो भवेद्भृत्यः (च), भर्तुर्भवेद्भृत्यै जग- (ट, प), शक्यो भवेद्भर्तुः जग- (त). (4). जनन्मात्रेण (अ, च). (5). जीयते (अ, प). (6). यो हि (अ), या श्रीः प्राण- (च). (7). श्रीर्नीतिमतां वैरमन्यनाहूता (ट, त, च). (8). वैरमन्यनाहूतापि धावति (अ), वैरमन्यनाहूता विधावति (प). (9). मन्त्रस्स पुन (अ). (10). महत् (ट).

+ 'कोशात्' इत्यारभ्य 'गुणेष्वाधारभूतेषु' इति पद्यारम्भपर्यन्तं 'क' पुस्तके नास्ति।

⊕ "प्रवदन्ति मनीषिणः" इति क, च, ट, त पुस्तकेषु नास्ति।

गुणिनस्सतो विभूत्यादीनां सुदुर्लभत्वम्

गुणेष्वाधारभूतेषु फले कस्यास्ति संशयः।
→ [1]शुद्धात्मनां [2]सतां [3]वृत्तिः [4]विभूतिश्च [5]सुदुर्लभा॥

नीतिज्ञानामेव नृपसहायकतायोग्यत्वम्

[6]शूरास्सर्वेऽप्युपायज्ञाः बुद्धिमन्तो [7]विचक्षणाः।
[8]सहायास्स्युर्नृपत्वे हि [9]तत्सहायनिबन्धनम्॥

[10]न वंशमार्गक्रमलालनाद्-गुणं
[11]निरीक्षते [12]शीर्न [13]वपुर्न [13]चागमम्।
[14]य एव गूढस्सुसहायवान् [15]सदा
तमेव [16]लक्ष्मीश्चपलापि सेवते॥

कार्यारम्भे सहायकावश्यकतासमर्थनम्

[17]नासहायवतः कश्चित् कार्यारम्भः प्रवर्तते।
[18]अन्तरिक्षाभिगमने विपक्षस्येव [19]पक्षिणः॥
[20]परार्थे निपुणा नीतिः [21]आत्मार्थे निपुणा मतिः।
प्राप्यते सुसहायेन [22]कर्णधारेण नौरिव॥

---

(1). व्यक्तश्चात्मा सतां प्र××× विभूतिश्च (अ), शुद्धात्मानः सतां (त, प). (2). सदा वृत्तिः (च). (3). वृत्तेः वि- (ट, त, प). (4). विभूतिर्न हि दुर्लभा (ट), विभूतिर्न च दुर्लभा (त), विभूतिर्हि न दुर्लभा (प). (5). न दुर्लभा (अ). (6). शूरास्सर्वविदश्शुद्धाः बुद्धि- (अ), शूरास्सर्व-

सहायशुद्धाः बुद्धि- (ट), स्वशास्सर्वोपधायुक्ताः बुद्धि- (त), स्ववास्सर्वसहायशुद्धा बुद्धि- (प). (7). विचक्षणः (अ). (8). सहायास्स्युर्नृपत्वस्य तत्स- (च, प), सहायास्स्युर्नृपत्वस्य सत्सहाय- (ट). (9). सत्सहायनिबन्धनम् (त). (10). न वंशवृत्तिश्रुतिशीचसद्गुणान् नापेक्षते श्री- (च), सद्वंशवृत्तिश्रुतिनीतिशक्तिः उत्साहसम्पन्नमतिश्च यस्य। य एव (ट), न वंशमार्गश्रुतिजालसद्गुणं निरीक्षते (त), न वंशवृत्तिश्रुतिशीचसद्गुणानपेक्षते श्रीः (प). (11). निरीक्षते तन्न वपु- (अ). (12). शीलं वपुर्न चागमम् (प). (13). चागमः (त). (14). स एव (अ). (15). चिरं तदैव लक्ष्मी- (अ). (16). लक्ष्मीश्च परापि (अ). (17). न सहायवतः (त). (18). अन्तरिक्षाभिगमनं वि- (अ, च), अन्तरिक्षाभिगमन-वि- (ट). (19). पतिणः (अ). (20) परार्थी निपुणा (ट). (21). आत्मार्थे मुह्यते मतिः (अ). (22). कर्णधारेव (अ).

→ "गुणेष्विति" पद्योत्तरार्धमारभ्य "नासहायवतः" इति पद्योत्तरार्धारम्भपर्यन्तं 'क' पुस्तके नास्ति।

नीतिमन्त्रादिप्रयोगाभिज्ञस्यैव पृथिवीशासनयोग्यता

+ आयव्ययौ [1]यस्य [2]सुसंविभक्तौ
[3]छन्नश्च चारो [4]निभृतश्च मन्त्रः।
न [5]चाप्रियं [6]प्राणिषु यो ब्रवीति
स सागरान्तां [7]पृथिवीं प्रशास्ति॥

गर्वान्धस्य अधःपतनैकयोग्यता

अभिमानवतां पुंसां [8]आत्मसारमजानताम्।
अन्धानामिव दृश्यन्ते पतनान्ताः [9]प्रवृत्तयः॥

---

(1). सस्य सुसंवि- (प), यस्य च संवि- (छ). (2). सुखं विभक्तं छन्नश्च (त). (3). प्रच्छन्नवाक्यो निभृतश्च (च). (4). निभृतं च मन्त्रः। (प). (5). चाशयप्राणिनि यो (क). (6). मन्त्रिषु (र). (7). वसुधां प्र- (ट). (8). आत्मानं ... रमजानताम्। (अ). (9). समुच्छ्रयाः। (अ).

+ 'आयव्ययौ' इति पद्यानन्तरं "सुचिरं हि चरन्" इति पद्यारम्भपर्यन्तं 'र' पुस्तकेऽन्या रीतिः।

तदेव [1]पुनरपि ब्रवीमि—[+2]युद्धमशक्यमिति । अथ सन्धिः [3]क्रियते चेत् स [4]चाप्यशक्योऽर्थः [5]सहजवैरानुबन्धिनाम् । [6]मेघवर्ण [7]आह— तात! कथं [8]तावदस्माकं [9]उलूकैस्सह सहजवैरमुत्पन्नम्? [10]चिरजीव्याह— [11]वाग्दोषात् । तथा च—

आपदः वाग्दोषजन्यता

[11]सुचिरं [12]हि चरन्नित्यं [13]ग्रीष्मे सस्यमबुद्धिमान् ।
द्वीपिचर्मप्रतिच्छन्नो [14]वाग्दोषाद्रासभो हतः ॥

[15]मेघवर्ण आह— [16]कथमेतत्? । [17]सोऽब्रवीत्—

---

(1). पुनर्ब्रवीति— युद्ध (च). (2). युद्धमशक्य इति (अ, च, त), युद्धमशक्यम् । अथ (थ). (3). क्रियते स (क, च, प). (4). चाप्यशक्यः सहज- (अ), चाप्यशक्तोऽर्थः सहज- (क), चाप्रशक्योऽर्थः सहज- (च), चाप्यशक्योऽर्थं सहज- (त). (5). सहजवैरानुबन्धनात् कस्सन्धिः? मेघवर्ण (अ), सहजवैरिणि कस्सन्धिः? मेघवर्ण (क). (6). मेघवर्णः— कथं ताव- (क), मेघवर्णः— अस्माकं उलूकै- (ट), मेघवर्णः कथमस्माकं (त), मेघवर्णः— तात! (थ). (7). आह— अस्माकं कथं उलूकै- (अ), आह— अस्माकमुलूकै- (च). (8). तावदस्माकं उलूकै (क), तावदुलूकैः- (थ). (9). उलूकैस्सहजवैरं जातम्? स आह—(अ), उलूकैस्सह वैर- (क, त). उलूकैस्सह कथं वैर- (ज, ट), उलूकैरस्माकं सहजवैर- (थ). (10). सोऽब्रवीत्— वाग्दो- (च), सोऽब्रवीत्— सुचिरं (त, प). (11). सुगुप्तं रक्ष्यमाणोऽपि दर्शयन् दारुणं वपुः । व्याघ्रचर्म (ग, ल). (12). विचरन्नित्यं (च). (13).

श्रेयश्शास्यमनु- (व). (15). वाकृते रासभो (य, ल), वाकृतात् रासभो (र), वाग्दोषद्दुर्दभो (व). (16). कथमेतत् ? आस्ति (च), कथयैतत्- ? (र). (17). स आह- अस्ति (अ), चिरजीव्याह- अस्ति (र), वानरः कथयति (ल), राजा कथयति- अस्ति (व).

+ युद्धमशक्यमित्यत्र 'युद्ध' इत्यनन्तरं 'अथ' इत्यारम्भपर्यन्तं 'क' पुस्तके ग्रन्थलोपः।

⊕ "चिरजीवी" इत्यनन्तरं 'सुचिरं' इति पदारम्भपर्यन्तं 'क' पुस्तके ग्रन्थलोपः।

↦ 'वाग्दोषात्' इति 'अ, च' योः पाठः।

→ 'सुचिरं' इतीदं पदं तदुपष्टम्भिका च कथा य, ल पुस्तकयोः लब्धप्रणाशतन्त्रे मकरवानरसंवादावसरे सङ्कलितो दृश्यते। 'र' पुस्तके तु मेघवर्णं प्रति चिरजीवि प्रोक्तोऽयं भागः इति दृश्यते। 'व' पुस्तके राजहंसबकयोः कथात्मकत्वेन विपरिणामितेऽस्मिन्नेव तन्त्रे बकं प्रति राजहंसोक्तोऽयं भाग आभाति।

वाचालत्वदोषे रजकरासभकथानकम् २

+[1]अस्ति ⊕[1]कस्यचिद्रजकस्य [u]अतिभारवहन-[*]समर्थः [2]खरः। [3]रजकेनापि [4]पोष्यबुद्ध्या द्वीपिचर्म-परिच्छन्नो [5]रात्रौ परसस्ये [6]मुक्तः। [+]स च यथेष्टं [7]परसस्यं [8]चरति [E]स्म। न [9]कश्चिदपि [10]व्याघ्रबुद्ध्या [11]तदन्तिकमागत्य सस्येभ्यो निवारयति।

---

(1). कस्यचिद्रजकस्य (च, त, प). (2). रासभः। रज- (अ), करभः। रज- (प). (3). रजकेन पोष्य- (अ), रजकेन च पोष्य- (ट), ततस्तेन रजकेनासौ द्वीपिचर्मणा प्रच्छाद्य अरण्यसन्निधानसस्य-मध्ये मुक्तः। (ज). (4). पोष्यबुद्ध्याथ द्वीपि- (त). (5). रात्रौ सस्य- (ज). (6). प्रमुक्तः। (अ, क, च, ट, न), प्रयुक्तः। तस्मिन् यथेच्छं (प). (7). परसस्यं भक्षयन् चरति (क), परसस्यान् चरति (च), यव-भक्षणं करोति (ट). (8). आचरति। न (त), चरति स्मति न (प). (9). कश्चित् व्याघ्र- (अ, त), किञ्चिदपि (प). (10). व्याघ्रबुद्ध्यैव तद्- (क, च). (11). तदन्तिकमागत्य निवा- (अ), तदन्तिक-मुपागम्य सस्येभ्यो (क), तदन्तिकमुपेत्य सस्येभ्यो न निवा- (च), तदन्तिकमुपेत्य सस्येभ्यो वारयति (ट), तदन्तिमुपेत्य नितरां सस्येभ्यो (त), तदन्तिकमुपगत्य सस्येभ्यो (ज).

+'अस्ति' इत्यारभ्य 'व्यापादित' इत्यारम्भपर्यन्तं 'ल' पुस्तके, 'अस्ति' इत्यनन्तरं 'यथेच्छं' इत्यारम्भपर्यन्तं 'य' पुस्तके, अस्ति इत्यनन्तरं 'रजकेनापि' इत्यारम्भपर्यन्तं 'व' पुस्तके चान्या रीतिः

वाचालत्वदोषे रजकरासभकथानकम् २

+ अस्ति ⊕[1] कस्यचिद्रजकस्य ᵘअतिभारवहन-समर्थः [2] खरः। [3] रजकेनापि [4] पोष्यबुद्ध्या द्वीपिचर्म-परिच्छन्नो [5] रात्रौ परसस्ये [6] मुक्तः। ⊢ स च यथेष्टं [7] परसस्यं [8] चरति ₣ स्म। न [9] कश्चिदपि [10] व्याघ्रबुद्ध्या [11] तदन्तिकमागत्य सस्येभ्यो निवारयति।

---

(1). कश्चिद्रजकस्य (च, त, प). (2). रासभः। रज- (अ), करभः। रज- (क्ष). (3). रजकेन पोष्य- (अ), रजकेन च पोष्य- (ट), ततस्तेन रजकेनासौ द्वीपिचर्मणा प्रच्छाद्य अरण्यसन्निधानसस्य-मध्ये मुक्तः। (ब). (4). पोष्यबुद्ध्याथ द्वीपि- (त). (5). रात्रौ सस्य- (ज). (6). प्रमुक्तः। (अ, क, च, ट, न), प्रमुक्तः। तस्मिन् यथेच्छं (प). (7). परसस्यं भक्षयन् चरति (क), परसस्यान् चरति (च), यव-भक्षणं करोति (श). (8). आचरति। न (त), चरति स्मति न (ख). (9). कश्चित् व्याघ्र- (अ, त), किञ्चिदपि (प). (10). व्याघ्रबुद्ध्यैव तदु- (क, च). (11). तदन्तिकमागत्य निवा- (अ), तदन्तिक-मुपागम्य सस्येभ्यो (क), तदन्तिकमुपेत्य सस्येभ्यो न निवा- (च), तदन्तिकमुपेत्य सस्येभ्यो वारयाति (ट), तदन्तिमुपेत्य नितरां सस्योभ्यो (त), तदन्तिकमुपगत्य सस्येभ्यो (प).

+ 'अस्ति' इत्यारभ्य 'व्यापादित' इत्यारम्भपर्यन्तं 'ल' पुस्तके, 'अस्ति' इत्यनन्तरं 'यथेच्छं' इत्यारम्भपर्यन्तं 'य' पुस्तके, अस्ति इत्यनन्तरं 'रजकेनापि' इत्यारम्भपर्यन्तं 'व' पुस्तके चान्या रीतिः

⊕ 'कस्यचिद्रजकस्य' इत्यनन्तरं 'अतोऽहं ब्रवीमि' इत्यारम्भपर्यन्तं 'द' पुस्तकेऽन्या रीतिः।

ᵘ 'अति' इति 'क' पुस्तके नास्ति।

⊢ 'स च' इति 'च' 'ट' पुस्तकमात्रपाठः। 'स च' इत्यारभ्य 'मध्य' 'अथ केनापि इत्यारम्भ पर्यन्तं 'व' पुस्तकेऽन्या रीतिः

₣ 'स्म' इति 'क' 'ट' पुस्तकमात्रपाठः।

अथ केनापि [1]सस्यरक्षकेण [2]धूसरकम्बल-कृततनुत्राणेन धनुस्सज्जीकृत्य [3]हन्तुकामेन [+]एकान्ते [4]अवस्थितम्। [5]तञ्च दूरे [6]दृष्ट्वा [7]खरः— [8]'रासभीयं'—इति [9]मत्वा शब्दं [10]कुर्वाणस्तदभिमुखमधावत्।

[⊕][11]ततस्तेन [12]सस्यरक्षकेण शब्दात् गर्दभोय-मिति [13]ज्ञात्वा विशिखेन दण्डेन [14]व्यापादितः। अतोऽहं ब्रवीमि— [15]सुचिरं हि [16]चरन्नित्यं— इति ॥

---

(1). सस्यरक्षिणा धूसर- (अ), सस्यरक्षकेण धनु- (च), शस्य-रक्षकेण (व). (2). धूसरकम्बलकृतत्राणेन (अ, त), धूसरकम्बल-× × × त्राणेन (क), धूसरकम्बलतनुत्राणेन (ट, प), धूसर-कम्बलकृतत्राणेन (त). (3). हन्तुमदात्तेन (त), आनतकायेनै-कान्ते स्थितम् (व). (4). स्थितम् (अ, ह), अवस्थितः (ज). (5). तं दूरे (अ), तच्च दूरे (क, ट), तं दृष्ट्वा (च, त), तं चादूरे दृष्ट्वा (व). (6). दृष्ट्वा जातकामः खरः (क, ट), दृष्ट्वा जातबलः खरः (च, त), दृष्ट्वा स गर्दभः पुष्टाङ्गो जातबलः रासभी- (व). (7). खरः सभीतित्वात् शब्दं (त). (8). रासभीयमिति स शब्दं (व). (9). मत्वा स शब्दं (क), ज्ञात्वा (व). (10). कुर्वाण अधावत् (अ. क, च. ट, त, प), कुर्वाणस्तदभिमुखं धावितः। तत- (व). (11). तेन शब्दं श्रुत्वा रासभोऽयमिति (च), अथ तैः क्षेत्रपैः रासभीयं प्रतिच्छन्न इति (अ). (12). सस्यरक्षकेण शब्दात् (अ, क, त), सस्यरक्षकेण गर्दभो (ज). (13). ज्ञात्वा व्यापा- (अ, च), ज्ञात्वा दण्डेन व्यापा- (क), निश्चित्य व्यापा- (ज), ज्ञात्वा विशिखेन व्यापा- (ह), मत्वा व्यापा- (त), ज्ञात्वा लगुड-पाषाणशरप्रहारैः व्यापा- (व), शब्दान्निश्चित्य लीलया व्यापा- (व). (14). व्यापादितवन्तः। (ल). (15). सुचिरं इति (ज), सुगुप्तं वक्ष्य-माणोऽपीति (च, ल). (16). चरन्नित्यमित्यादि (व).

+ 'एकान्ते' इति 'अ, व' पुस्तकयोः पाठः।

⊕ "ततस्तेन" इति 'व' पुस्तकपाठः।

[1]एवमस्माकमपि +[2]वाग्दोषात् [3]वैरं [4]जातम्।

तथा हि—

वायसोलूकयोर्वैरोपकथा—३.

[5]एकदा पक्षिणां [6]राज्यविभूतौ [7]राज्याभिषेकार्थं [8]सर्वपक्षिभिः [9]उलूकः सम्प्रधारितः। ततः [10]सर्वो अभिषेकसम्भाराः सम्पूर्णाः। [11]अभिषेकसमये [12]वृद्धकाक [13]एकस्समायातः। [14]सोऽपि [15]सर्वैः

---

(१). एवं भवतामपि (क). (२). वाग्दोषेण वैरं (ट). (३). वैरं सञ्जातम्। (च). (४). जातम्। यतः— एकदा (अ). (५). कदाचित् (ल). (६). राज्यविवादे राज्या- (अ, च), राजविवादे राजाभि- (क), राजविवादेन राज्याभि- (ट). (७). राज्याभिषेकं पक्षिभिः सर्वैर्मिलित्वा उलूकः (अ), राजाभिषेकं प्रति सर्वपक्षिणामिः मन्त्रयित्वोलूकः (क), राज्याभिषेके पक्षिभिर्मन्त्रयित्वा उलूकः (प). (८). सर्वपक्षिभिः मन्त्रयित्वा उलूकः (च, ट). (९). उलूको निश्चितः (अ). (१०). सर्वाभिषेक- (अ, ट), सर्वो अभिषेकार्थाः सम्पूर्णा (क), सर्वे अभिषेकसम्भारसमये अस्मदीयो दम्भनीचो नाम वृद्ध- (च), सर्वाभिषेकसम्पूर्णसम्भारसमये वृद्धः काक एव समानीतः (प). (११). अभिषेककाले वृद्ध (अ). (१२). वृद्धकाक आगतः (अ), वृद्धकायः काक एक- (क), वृद्धकाकस्समागतः (च). (१३). एकस्समागतः। सर्वे- (ट). (१४). स च सर्वे- (क, प), स च मन्त्रकरणसमये वृद्ध- (च). (१५). सर्वैर्मन्त्रकरणाय सर्वैरनुमत्यर्थं वृद्ध- (अ), सर्वैस्सम्म" "रणे वृद्ध- (क), सर्वैर्मन्त्रिभिः वृद्ध- (ट), सर्वैर्मन्त्रिकरणसमये वृद्ध- (प).

\+ "वाग्दोषात् वैरं" इत्यारभ्य "नीतिशास्त्रार्थतत्त्वज्ञः" इति पद्यानन्तरं "विजय आह— यदाज्ञाप" इत्यन्तं त पुस्तके ग्रन्थपातः प्रदृश्यते।

[1] वृद्धपक्षिभिः [2] पृष्टः— किमुचितमिति । [3] स आह— [4] कथं भवद्भिः [5] दिवान्धस्य [6] विकटरूपस्याव्यपदेश्यस्य [7] राज्याभिषेकः क्रियते—

पक्षिराज्याभिषेकानर्होल्लूकरूपगुणादिवर्णनम्

[8] स्वभावक्रोधमत्युग्रं [9] क्षुद्रमप्रियदर्शनम् ।
[10] उलूकमभिषिच्यैनं [11] कथं रक्षा भविष्यति ॥

व्यपदेशात्कार्यसिद्धिसमर्थनम्

[12] व्यपदेशेन सिद्धिस्स्यात् असत्यपि नराधिपे ।
[13] शशिनो [14] व्यपदेशेन [15] शशकास्सुखमेधते ॥

[16] पक्षिण ऊचुः— [17] कथमेतत्? [18] सोऽब्रवीत्—

---

(1). वृद्धपक्षिभिः कथमिति पृष्टः (च). (2). पृष्टः— स (अ, च, प), पृष्टः–अनुचितमिति (क), पृष्टः–अत किमुचितमिति (ट). (3). अथासौ विहस्य प्राह— न युक्तमेतत् । अस्य दिवान्धस्य (य), असावाह (ट), अथासौ काको विहस्याह (ल). (4). कथं वा भवद्भिः (प). (5). दिवान्धस्यासदृशरूपस्य व्यपदेश्यस्य राज्यमभिषिच्यते– स्वभाव- (प). (6). विकृतरूपस्याव्यप- (अ), विकटरूपस्याप्यव- (क, च), विसदृशरूपस्याप्यव- (ट). (7). राज्यमुपगम्यते । स्वभाव- (अ), राज्यमिदमभ्युपगम्यते । स्वभाव- (क, च), राज्यमभ्युपगम्यते । स्वभाव- (ट). (8). स्वभावरौद्रमत्युग्रं (य, र, ल). (9). क्षुद्रमत्युग्रदर्शनम् (अ), क्रूरमप्रियवादिनम् (य, ल), क्षुद्रमप्रियवादिनम् (र). (10). उलूकमभिषिच्यैव कथं (अ, प), उलूकमभिषिच्याद्य कथं (क), उलूकमभिषिच्यात्र कथं (ट), उलूकं नृपतिं कृत्वा का नस्सिद्धिर्भविष्यति (र), उलूकमभिषिच्यैवं न नः श्रेयो भविष्यति (र). (11).

कथं राज्यं भविष्यति। (व). (12). व्यपदेशेन महतां सिद्धिः सम्प्राप्यते परा। शशिनो (य), व्यपदेशेऽपि सिद्धिस्स्याद्दशान्त-श्चेत् नराधिपः। शशिनो (र), व्यपदेशेन महतां सिद्धिस्सम्प्राप्यते परा। शशिनो (ल), व्यपदेशेन सिद्धिस्स्यादतिशान्ते नराधिपे। शशिनो (व). (13). शशिनोऽप्यपदेशेन (क). (14). व्यपदेशेन वसन्ति शशा- (य, र, ल). (15). शशकास्सुखम्॥ (य, र, ल), शशकास्सुखमासते (व). (16). विहगा ऊचुः— (य), पक्षिणः— कथ- (ट), पक्षिणः पृच्छन्ति— कथ- (प), अतः शेषाः पतत्रिण आहुः— कथ- (र). (17). कथमेतत् (र). (18). काक आह—कस्मिं- (अ), काक उवाच— कदाचित् (क), दमनीचोऽब्रवीत्— कदाचित् (च), काक आह— कदाचित् (ट), सोऽब्रवीत्— कदाचित् (प), वायसः कथयति— कस्मिं- (य), सोऽब्रवीत्— अस्ति। कदाचित्- (र), स आह— कस्मिं- (ल).

⊕ 'स आह' इत्यनन्तरं 'स्वभाव' इति पद्यारम्भपर्यन्तं 'र' 'ल' पुस्तकयोरन्या रीतिः।

+ 'दिवान्धस्य' इत्यनन्तरं 'स्वभाव' इति पद्यारम्भपर्यन्तं 'य' पुस्तकेऽन्या रीतिः।

⊢ 'स्वभाव' 'व्यपदेशेन' इत्यनयोः पद्ययोर्मध्ये 'य' 'र' 'ल' पुस्तकेष्वन्या रीतिः।

→ 'व्यपदेशेन' इति पद्यानन्तरं 'गजयूथो' इत्यारम्भपर्यन्तं 'व' पुस्तकेऽन्या रीतिः।

महदुपदेशे शशकमहागज-कथा-४.

+[1]कस्मिंश्चित् वनोद्देशे [2]कदाचित् ।[3]द्वादशवार्षिक्यामनावृष्टौ तृषितो [4]गजयूथः यूथपतिमाह—
⊕ नाथ! [5]को ह्युपायोऽस्माकम् ?

[6]अस्त्यत्र क्षुद्रजन्तूनां [7]निमज्जनसहं पयः।
[8]तिग्मांशुरश्मिखिन्नानां [9]करिणां [10]तु सुदुर्लभम्॥

---

(1). कस्मिंश्चिद्वने कदाचित् (अ), अस्ति कदाचित् (ट). (2). कदाचिन्महत्यनावृष्टिः (ल). (3). द्वादशवार्षिक्यनावृष्ट्यां सत्यां तृषितो (अ), द्वादशवार्षिक्यामनावृष्टौ सत्यां तृषार्तो गज- (क), द्वादशवार्षिक्यां अनावृष्ट्यां तृषार्तो गज- (च), द्वादशवार्षिक्यां अनावृष्ट्यां सत्यां तृषार्तो गज- (ट), द्वादशवर्षमनावृष्टौ तृषार्तो गज- (प), द्वादशवार्षिक्यनावृष्टिः आपतिता (ट). (4). गजयूथपतिः कदाचित् गजानाह (क). (5). कोऽभ्युपायमस्माकम् (अ), कोऽभ्युपायमस्माकम् (च), कोऽप्युपायो (ट), को ह्युपायो ह्यस्माकम् (प), कोऽस्त्युपायोऽस्माकम् (व). (6). अस्त्यत्रैव हि जन्तूनां (प). (7). निमज्जनवहं (अ). (8). तीव्रांशुकरभिन्नानां करिणां (अ), तीव्रतापेन भिन्नानां करिणां (क), तिग्मांशुरश्मिखिन्नानामस्माकं तु (ट), तीव्रतापेन खिन्नानां (प). (9). करेणूनां च दु- (प). (10). तु सुदु- (अ, च, ट).

+ कस्मिंश्चिद्वने इति 'क, च, ट, प' पुस्तकेषु नास्ति। कस्मिंश्चिद्वनोद्देशे इति 'व' पुस्तकपाठः। 'कस्मिंश्चिद्वनोद्देशे' 'कदाचित्' इत्यनयो मध्ये 'य' 'ल' पुस्तकयोरन्या रीतिः।

। 'द्वादशवार्षिक्यामनावृष्टौ' इत्यनन्तरं 'यूथपतिना प्रतिदिशं' इत्यारभ्यपर्यन्तं 'य' 'र' पुस्तकयोः स्पृशन्निव' इति पद्यारम्भपर्यन्तं 'ल' पुस्तके चान्या रीतिः।

⊕ 'नाथ!' इत्यारभ्य 'भूयं यत्र कुत्रापि सरो वापी' इत्यारम्भपर्यन्तं 'क' पुस्तके नास्ति॥

→ 'निमज्जन' इत्यनन्तरं 'स्पृशन्निव' इति पद्यारम्भपर्यन्तं 'व' पुस्तकेऽन्या रीतिः।

[1]ततो-[+]"यत्र कुत्रापि सरो वापी वा विचिन्वन्तु भवन्तः;"- इति [2]यूथपतिना [3]प्रतिदिशमुदकान्वेषिणो [4]वेगवन्तो [5]गजाः [6]प्रेषिताः। तेष्वेकेनागत्य [7]कथितम्- "देव! नातिदूरे [8]व्योमैकदेशमिव निर्मलाम्भो महच्चन्द्रसरो नाम सरस्तिष्ठति"-[F]इति।

---

(1). ततो यूथ- (अ, च, ट, प), ततस्तेनाष्टास्वपि दिक्षूदकान्वेषणाय (ख), यतोऽष्टास्वपि दिक्षु प्रेरिता उदकान्वेषणाय वेग- (ड). (2). यूथपतिना वेग- (अ, च), यूथपतिना मेघवन्तो नितरां प्रतिदिशं प्रेषिताः (प). (3). प्रतिदिशमुदकान्वेषणे वेग- (ट). (4). वेगचण्डानुचराः प्रेषिताः। (अ). (5). गजा भवन्तो निरन्तरं प्रतिदिशं प्रेषिताः। (च). (6). प्रेषिताः। एकेनागत्योक्तम्- देव! (अ), प्रेषिताः तेषु तत्रैकेनागत्य (क, ट), प्रेषिताः। अथैकेनागत्य (च), प्रेषिताः। तत्र च केनाप्यागत्य (प). (7). कथितम्- नाथ! नाति- (च, प). (8). व्योमखण्डमिव मह- (अ), व्योमैकदेश इव चन्द्रसरो (च), व्योमैकदेशमिव मह- (ट, प). (9). निर्मलाम्भश्चन्द्रसरो (क).

+ अत्र 'यूयं यत्र कुत्रापि सरो वापीं वा विचिन्वन्तु इति' 'क' पुस्तकपाठे यूयमिति भागैकदेशं विहाय सर्वोऽपि भागः, तथा "ततो यूथपतिना वेगवन्तो गजाः भवन्तो निरन्तरं प्रतिदिशं प्रेषिता" इति 'च' पुस्तकपाठे "भवन्तः" इति भागैकदेशश्च- "ततो यत्र कुत्रापि सरो वापीं वा विचिन्वन्तु भवन्तः"- इति शुद्धपाठे सङ्कलितः।

⊕ 'वेगवन्तः' इत्यनन्तरं 'नीतिशास्त्रार्थ' इति पद्यारम्भपर्यन्तं 'ट' पुस्तकेऽन्या रीतिः।

⊢ 'प्रेषिताः' इत्यनन्तरं 'नीतिशास्त्रार्थ' इति पद्यारम्भपर्यन्तं 'च' पुस्तकेऽन्या रीतिः।

F 'इति' इति 'क' पुस्तकमात्रपाठः।

+[1] तच्छ्रुत्वा गजराजस्तदैव सहर्षं[2] सर्वान् आदाय प्रस्थितः। हस्तिनस्सर्वेऽपि तदभिमुखे चलिताः। गच्छता [3]महता ⊕[4]यूथेन [5]सरस्तीरे पादाघातेन प्रेतप्राया बहवश्शशकाश्चूर्णीकृताः। अनन्तरं शिलीमुखो नाम [6]शशकराजः सर्वानमात्यान् आहूय मन्त्रयामास।

---

(1). गजराजश्च सर्वा (च), हस्तिराजः सर्वा- (ट), हस्तिराजं चैव सर्वा (प). (2). सर्वान् गृहीत्वा सत्वरं तथैव अनुगच्छता (चे), सर्वान् गृहीत्वा सत्वरं सहर्षं चलितः। गच्छता (ट,च). (3). महता गजयूथेन (ट). (4). यूथेन विततपादपाः शीर्णाः शशकाः (ज). (5). सरस्तीरे विततबहुपादपे पादाघातेन (च), सरस्तीरे विततपादपाः तेन शशकाः (ट), सरस्तीरे विततः पादेन शशाश्चूर्णी- (प). (6). शशराजः (ट). (7). सन्निपत्यामन्त्र- -यामास (क), गृहीत्वा मन्त्र- (च, ट).

+ "तच्छ्रुत्वा" इति 'क, ट' पुस्तकयो पाठः। तच्छ्रुत्वा इत्यनन्तरं "हस्तिनः सर्वेऽपि" इत्युत्तरवाक्यारम्भपर्यन्तं 'क' पुस्तके न दृश्यते।

⊕ यूथेन इत्यनन्तरं "विनष्टमस्मत्कुलं" इति इत्यस्मात् प्राक् ~~[illegible]~~ 'अ' पुस्तकेऽधः प्रदर्शितो भागः दृश्यते—
" अन्यत्र पानीयाभावात् अत्रैवागन्तव्यम्। तेनागच्छता त्वादिशो आप्यागन्तव्यम्। अथ प्रसराभावात्" इति॥

+[1]शिलीमुख आह- [2]गजयूथेनान्यत्र [3]पानीयाभावादत्रागतम् । तेन [4]च गच्छता महता [5]यूथेन [6]विनष्टमस्मत्कुलम् । [7]अत्रान्तरे बहु-
वृत्तान्तदर्शी विजयो [8]नाम [9]शशकस्तमाह- ⊕देव !
→[10]अस्ति चायमुपायः ! [11]शक्य [12]रावायं गजपतिना

---

(1). शिलीमुखो गज- (च), राज्ञा गज- (ट), राजाह- अस्मिन् महत्सेनयान्यत्र पानीयाभावात् रावात्रागतम् (प). (2). गज-यूथेन विनष्ट- (क). (3). पानीयाभावादेवात्रागम्यते । तेन (ट). (4). चागच्छता बहुत्वान्मेघवद्दिशो व्याप्यन्ते । अतः प्रसारा-भावात् विनष्ट- (ट), चागच्छता बहुत्वान्मद्दिशो व्याप्यते । अतः प्रसराभावात् नष्ट- (प). (5). यूथेन मेघैरिव दिशो व्याप्यन्ते । अद्याहाराभावात् विनष्ट- (च). (6). विनष्टमस्माकं कुलम् । किं कुर्मः ? अत्र × × × × दर्शी (क). (7). तत्रान्तरे (अ). (8). नाम मन्त्री तमाह (च). (9). शशको मन्त्रिणमाह- (अ). (10). अस्त्येवायमुपायः ! तेन चात्र गजयू- (च). (11). शक्य-मेतत् । येन तत्र गजयू- (अ), शक्यं ते तेन चात्र गज- (क). (12). रावार्थं तेन चात्र गजपतिः न वर्तयितुं (प).

+ "शिलीमुख" इत्यारभ्य 'विनष्टमस्मत्कुलं' इत्यारभ्य-पर्यन्तं 'अ' पुस्तके नास्ति ।

~~'शिलीमुख" [illegible] इत्यारभ्य "[illegible]" [illegible] 'अ' पुस्तके [illegible]~~

'शिलीमुख' इत्यारभ्य- 'नीतिशास्त्रार्थ' इति पद्यारम्भपर्यन्तं 'य' ~~[illegible]~~ 'र' पुस्तकयोः, 'स्पृशन्निव' इति पद्यारम्भपर्यन्तं 'ल' पुस्तके, 'तत्र प्रचलितः' इत्यारम्भपर्यन्तं 'व' पुस्तके चान्या रीतिः ।

⊕ 'देव' इति 'अ' पुस्तकमात्रपाठः ।

→ 'अस्ति चायमुपायः' इति 'क' 'च' पुस्तकयोः पाठः ।

सह [1] गजयूथो [2] निवर्तयितुम् । [3] तच्छ्रुत्वा [4] शिलीमुखः सहर्षमाह— [+] भद्र! [5] तूर्णमनुष्ठीयताम्—

कार्यसाधनाय योग्यस्यैव प्रेषणौचित्यम्

नीतिशास्त्रार्थतत्त्वज्ञो देशकालविभागवित् ।
[6] विजयः प्रेष्यते [7] यत्र तत्र [8] सिद्धिरनुत्तमा ॥

[9] विजय आह— देव! [10] यथाज्ञापयति स्वामी तथा अस्मदादीनां हितं करिष्यामि— [11] इत्युक्त्वा तत्र [12] प्रचलितः। तत्र गत्वा तद्गजयूथं दृष्ट्वा

---

